PRACYAVANI SANSKRIT TEXT SERIES
Vol. XXXVII

पश्चिमवङ्ग-संस्कृत-शिक्षापरिषदध्यक्षेण

डक्टर-श्रीयतीन्द्रविमलचतुर्धुरीणेन विरचितं

विमल-यतीन्द्रम्



The Vimala-Yatindram

(A new Sanskrit Drama on Sri Ramanuja Acharya)

BY

Dr. Jatindra Bimal Chaudhuri
PH. D. (LONDON)
Secretary, W. Bengal Govt. Sanskrit Siksha Parishat
(Formerly, Principal, Calcutta Sanskrit College)

(Staged for the first time in Madras under the
auspices of All India Vaisnava Conference
On the 25th December, 1961
And for the second time in Sri Aurobindo Ashram,
...on the 27th December 1961)

Foreword by

...ikeri Mookherji


...LCUTTA, 1962.

PRACYAVANI SANSKRIT TEXT SERIES
Vol. XXXVII

पश्चिमवङ्ग-संस्कृत-शिक्षापरिषदध्यक्षेण

डक्टर-श्रीयतीन्द्रविमलचतुर्धुरीणेन विरचितं

विमल-यतीन्द्रम्



The Vimala-Yatindram

(A new Sanskrit Drama on Sri Ramanuja Acharya)

BY

Dr. Jatindra Bimal Chaudhuri

PH. D. (LONDON)

Secretary, W. Bengal Govt. Sanskrit Siksha Parishat
(Formerly, Principal, Calcutta Sanskrit College)

(Staged for the first time in Madras under the auspices of All India Vaisnava Conference On the 25th December, 1961 And for the second time in Sri Aurobindo Ashram, Pondicherry, on the 27th December 1961)

Foreword by

Dr. Satkori Mookherji

CALCUTTA, 1962.

Published by—

Dr. J. B. CHAUDHURI

FOR

PRACYAVANI

(Institute of Oriental Learning)

3, Federation Street, Calcutta-9

Available from the

PRACYA VANI

Address as above

Chowkhamba Sanskrit Series Office

Banaras City

MOTILAL BANARSIDAS

P. B. 75, Chowk, Banaras City

Or

Jawaharnagar, Delhi

Munshiram Monoharlal

P. B. 1165, Nai Sarak, Delhi—6

Printed by—

Sri Ajit Kumar Banerji

Bani Lekha Press

7B, Rammohan Saha Lane,

Calcutta—6

Rexin : Rs. 6/- Price Rs. 4/-

BLESSINGS

I have very great pleasure in writing again a few lines as my loving blessings to my beloved pupil Dr. Jatindra Bimal Chaudhuri.

On a few previous occasions, I recorded my deep appreciation of his research abilities, and dramatic genius, and I am very glad to be able to do so once again. The present work with a very beautiful and appropriate name Vimala-Yatindram (Yatindra or Yatipati as well-known is the name of Ramanuja) manifests all the laudable and loveable characteristics of his previous dramatic works, such as simplicity and sweetness of language, breadth and depth of thought, originality of technique, melody of songs, and rhythmic grace of verses.

Jatindra Bimal is recently engaged in propagating Bhakti-Dharma through such easily intelligible and vastly popular medium, viz., dramas and songs. Accordingly, all his Sanskrit dramas, about fifteen in number except one or two, are based upon the holy lives of well-known men and women Devotees, Saints, and Scholars. But it will be manifestly wrong to think on that account that they lack originality. On the contrary, they are all based on the one hand painstaking Research for which Jatindra Bimal is celebrated and on the other, reflect great poetic genius for which also he is equally celebrated. Hence all his dramas make a very pleasant reading, being factual yet entirely fresh.

At this late hour, it is not necessary for me to write a long foreword for Jatindra Bimal's works. His Research and Poetic works have already introduced him to, and made him, well-known throughout, the whole of India and also outside.

So, I only pray to God for his long life which will enable him to serve the Holy cause of his beloved Deva-bhasha, for a long, long time to come—with full vigour and joy.

Satkari Mookherji.

CONTENTS

NANDI OR BENEDICTORY VERSE

PRASTAVANA

Sutradhar, Nati :

The Stage Manager points out to the Natī that Rāmanuja being the first exponent of the Bhakti Dharma, it is but fit and proper that a drama on his holy life should be staged in New Delhi, a celebrated place where Religion flourished from ancient times.

Scene I.

Place : The teaching Institute at the House of Yadavaprakāsa at Kancipuram, Time : Midday.

Yādavaprakasa, one Disciple of Yadavaprakāsa and Lakṣmaṇa (or Ramanuja in early life).

Ramānuja went to Kancipuram to take some lessons from Yādavaprakāsa, the famous Advaitavadin of those days. But his explanation of the famous scriptural Text Kapyāsam puṇḍarīkākṣam etc. after Samkaracarya fails to satisfy Ramanuja who gives a new interpretation of his own. This infuriates Yadavaprakāsa who plans to kill Rāmanuja by drowning him in the Ganga in the North.

Scene II.

Place : Gonḍāraṇya in Vindhyācala.
Time : Early Dawn.

Lakṣmaṇa (Ramanuja) and Govinda—son of his maternal aunt.

Govinda coming to know of the evil designs of Yādavaprakāśa, warns Rāmānuja who flees away to the interior of the Forest.

Scene III

Place : Interior of Gondaranya. Time : Morning.
Lakṣmaṇa, Fowler and his wife.

Ramānuja's life is graciously saved by Laxmi-Narayana in the guise of a Vyādha Couple.

Scene IV.

Place : A grave-yard on the Kaveri. Time : Afternoon.

Lakṣmaṇa (Rāmānuja), Mahapurna, a foremost

disciple of Yāmunācārya and another disciple of Yāmunācarya called Vararaṅga.

Mahāpurna was sent by Yamunacarya himself for fetching Ramanuja Acarya from his residence. By the time they reach the place, Alavandar Yamunacarya breathes his last. Ramanuja comes to know from Vararanga about the last three wishes of Alavandar which he promises to fulfil in future. Then, the three fingers of Yamunacarya which were so long bent, become straight,

Scene V.

Place : Kancipurna's House. Time : Forenoon.

Kancipurna, Ramanuja and his wife, Mahapurna and his wife.

Kāñcīpurna, on his return from Tirupati, removes the doubt of Ramanuja about certain religious and philosophical problems. He refuses to initiate Ramanuja as he himself was a person of low caste but advises him to approach Mahapurna for initiation. Mahapurna initiates him.

Scene VI.

Place : Ramanuja's House. Time : Midday.

Ramānuja's wife Jāmāmba, Mahāpurṇa's wife and Laksmana (Ramanuja).

Rāmānuja's wife Jāmāmba rebukes the wife of Mahapurna, their spiritual Guru, for pouring some drops of water from her pitcher into that of her own. Consequently, Mahāpūrna and his wife leave the house of Rāmānuja. On his return home, Ramanuja finds his Guru away from his house and searches for him in vain. Then Ramanuja, once for all, makes up his mind to renounce the world.

Scene VII.

Place : Ramanuja's House. Time : Afternoon.

Yadavaprakasa, Kureśa, Daśaratha and Ramanuja.

At the instance of his mother and also on account of the instruction of Varadaraja imparted through Kancipurna, Yadavaprakāśa now feels inclined to become a disciple of Ramanuja. Ramanuja himself replies to some

queries of Yadavaprakasa and his favourite disciple Kuresa to the rest. Ramanuja initiates him and gives him a new name viz. Govindadasa. He also requests him to compose a new book called Yati-dharma-samuccaya.

Scene VIII

Place : House of Gosthipurna. Time : Forenoon.

Laksmana (Ramanuja), Gosthipurna, some wayfarers.

Ramanuja prays to Gosthipurna for acquainting him with the secret Mantraraja. Eighteen times Gosthipurna refuses and subsequently, consents to do so. Gosthipurna requests Ramanuja to keep the Mantraraja secret for ever. But Ramanuja makes a clean breast about it to hundreds within a few hours of his getting the Mantra. At first, Gosthipurna becomes much annoyed but subsequently approves the action of Ramanuja.

Scene IX.

Place : A street leading to Srirangam. Time : Forenoon.

Kuresa, Ramanuja, Assailant Kasmiri Pandits.

When Ramanuja is returning from Kasmir with the Bodhāyanavritti the only copy of which was available at Saradapith, Kasmir, the assailant Pandits waylay Ramanuja and Kuresa after a month of their departure from Kasmir and snatch it away from them. Ramanuja becomes very mortified but Kuresa promises to present his Guru with an exact copy of the Bodhayana-vritti within only a few days because he has already got by heart the whole of the work by sitting up late at night when his Guru was sound asleep.

Ramauuja begins to dictate the Sribhasya, requesting Kuresa to pause from writing as soon as he finds some indiscrepancy or defect in his dictation.

Scene X.

Place : Srirangam. Time : Evening.

Ramanuja and Dhanurdasa,

Once Ramanuja finds Dhanurdasa in the company of a woman whom he adored as the best Beauty on Earth. Ramanuja soon arranged to show him the beautiful image of Laksmipati at Srirangam. Dhanurdasa agreed

that the Eyes of God were much more beautiful than those of Hemamba and become a Disciple of Ramanuja.

Scene XI.

Place : Residence of Dhanurdasa in Sri: angam.

Time : Night.

Hemamba, some Brahmanas engaged in theft.

Hemamba who was deeply attached to Dhanurdasa and permitted by Sri Ramanuja to stay with him willing—ly parted away with all her golden ornaments feigning that she was really asleep. Rāmanuja now made his Disciples understand the differnce between them and Dhanurdasa—Hemamba. Oh ! what a gulf of difference as was so beautifully demonstrated by Sri Ramanuja himself !

Scene XII.

Place : Palace of the Cola King, Time : Forenoon.

Colaraja, Kuresa in the guise of Ramanuja, Rajapurusa.

The king of Cola now becomes determined to punish Ramanuja for preaching Vaisnavism. He arranges a mock debate in his own court between his own Pandits and Kuresa in the guise of Ramanuja. Kuresa vanquishes his opponents but the king punishes him with the loss of his eyes. Kuresa, however, prays that the king and the associates may not incur any sin for inflicting pains upon him and removing his eyes.

Scene XIII.

Place :—Banyan Tree, on way to Srirangam Temple.
Time : Afternoon.

Lacimar a Muslim Princess, Kubera a Mahomedan, Ramanuja underneath a Banyan tree on the street, Candalapatni, Candalas, Visnuvardhana, Govinda and Kuresa.

Ramanuja is greeted by his disciples converted from other religions, such as Saivas, Buddhists, Mahommedans etc.

Ramanuja wishes all well, with blessings.

THE END.

विमल-यतीन्द्रम्

(नाटकम्)

डक्टर-श्रीयतीन्द्रविमलचतुधुरीण-विरचितम् ।

प्रस्तावना

(नान्दी)

कान्तिमतीसुतं यामुनतोषकं
काञ्ची-गोष्ठी-महापूर्णोरूपम् ।
माहम्मद्-सौगत-शैव-मेलकं
नौमि रामानुजं विमलयतीन्द्रम् ॥१॥

नान्द्यन्ते सूत्रधारः। [प्रविश्य]

ॐ प्रणमामि भगवन्तं श्रीरामानुजम् ।

अद्य माद्राजधाम्नि निखिलभारत-वैष्णवसम्मेलन-कर्तृपक्षैः समादिष्टोऽस्मि सम्मेलनोत्सवेऽस्मिन् वैष्णवाग्रगण्य-भगवदवतार-श्रीलरामानुजचरितमवलम्ब्य किञ्चन नाटकं नाट्ये प्रयोक्तव्यमिति। तद्वयं वङ्गप्रान्तसर्वकारीय - संस्कृत - शिक्षा - परिषदध्यक्षेण डक्टर - श्रीयतीन्द्रविमलचतुधुरीणेन विरचितं विमलयतीन्द्रं नाम संस्कृत-नाटकं नाट्ये प्रयोक्तुमुद्यता वर्तामहे ।

भक्तिविलासतीर्थोऽसौ नन्ददुलालसेवितः ।
समादिशत् परस्नेहाच्छ्रीरामानुजपूजनम् ॥२॥
समुदुयुक्तास्ततो नूनं वयं रामानुजार्चने ।
गुरुवर्याशिषा स्यान्नो भूयसी कृतकृत्यता ॥३॥

किन्तु कथं चिरायते मम सर्वकर्मनिपुणा नटी ? अपि न नाट्य-कार्यं सर्वमवसितम् ?

हन्त भोः !

स्त्रैणं जना मां कथयन्तु काममुद्घोषयाम्यूर्ध्वभुजस्तथापि ।
वृद्धः स्खलन् वर्त्मनि सूत्रधारो यष्ट्येव नट्या ध्रियते प्रयोगे ॥४॥

तत् तामाह्वयामि । देवि देवि ! न चेत्तत्र कार्यविघ्नस्तत् त्वरितमत्रा-गम्यताम् ।

(प्रविशति नटी)

नटी । देव ! इयमहमागताऽस्मि । सम्यक्तया विहितं नेपथ्यकर्म ।

सूत्रधारः । तत्र त्वं सर्वथा सर्वदा कुशलिनी । पश्य देवि ! निखिलविश्वस्य दिग्दिगन्तेभ्यः समागता अद्य महोत्सवेऽस्मिन् सहस्रशो वैष्णवभक्ताः । भक्त-भागवत-भगवतां साम्यं समुद्दिष्टमस्माकं श्रीशास्त्रेषु सर्वत्र, विशेषतो वैष्णवधर्मग्रन्थेषु । तत् प्राथम्येन वैष्णव-जनेभ्यः प्रणामोऽस्माकं विधीयताम् ।

नटी । एतत् सुष्ठूक्तं भवता । तत्

यैर्भक्तैर्भक्तिमहिम्ना पूर्णमधिकृतं भगवतो हृदयं, यानुद्दिश्य मुहु-र्मुहुर्भगवान् प्रोद्घोषयति मत्तो मम भक्तो गरीयान् इति, येषां चरण-पङ्कजमधुना मधुमयं जातं जगत् कृत्स्नं—तेषां भक्तप्रवराणां चरणेभ्यः कोटिशो नमः ।

सूत्रधारः । देवि ! सुदूरवङ्गप्रान्ताद्वयमत्र समागता न केवलं धर्मानु-शासनश्रवणद्वारेणात्मनः पावित्र्यसम्पादनाय, परन्तु परस्परमेलन-क्रमेणास्माकं सुचिरवर्तिनीं वङ्गदेश-दक्षिणापथमैत्रीं प्रवर्धयितुम् । ततेभ्यो दाक्षिणात्येभ्योऽपि प्रणामाञ्जलिरस्माभिर्देयः ।

नटी । बाढं देव ! तदपि मया क्रियते ।

यस्मिन् दक्षिणावर्तभूभागे जाता भारतवर्षस्य सर्वे श्रेष्ठदार्शनिक-

प्रवराः श्रीशङ्कराचार्य-रामानुज-निम्बार्क-माध्वप्रमुखाः, घोरे तमसाच्छन्न-काले यस्मिन् स्थाने भारतवर्षस्य सभ्यता धर्मो दर्शनं च लेभिरे शान्ति-क्रोडम्, सदाचाराः सर्वेऽद्यापि यत्र कुर्वन्ति वासं तस्य दक्षिणावर्तस्य निवासिभ्योऽस्मदीया भूयो भूयः प्रणामाः।

सूत्रधारः। देवि! पश्य, पश्य—

करोत्तमाङ्ग-संयोगेनानतिं ज्ञापितास्त्वया।
सत्कुर्वन्ति शिरःकम्पेनैते त्वामपि सज्जनाः॥५॥

नटी। देव! अस्ति ममाद्यतननाटकविषये कश्चन प्रश्नः। कृपया प्रत्युत्तरदानेन कौतूहलं मम निवार्यताम्।

सूत्रधारः। देवि! त्वदर्थं किं न मया कर्तुं पार्यते? निश्चित-मेवाहं सर्वं प्रयत्नं करिष्ये।

नटी। कथं रामानुजचरितमेव समुद्दिष्टं निखिलभारतवैष्णव-सम्मेलनकर्तृपक्षैरभिनयार्थं, न निम्बार्कस्य, न मध्वस्य, न वेङ्कटनाथ-वेदान्ताचार्यस्यान्यस्य कस्यचन वैष्णववर्यस्य वा?

सूत्रधारः। चरित्रविशेषे केषांचन समनुरक्तिर्विधिनिर्दिष्टा। अनु-रागस्योत्पत्तिविषये कारणं नास्माभिः सर्वदा ज्ञातुं शक्यते।

तथाहि पश्य,

गच्छत्सु वर्त्मनि जनेष्वविरामगत्या
स्निह्यत्यहेतु हृदयं क्वचिदेव तीव्रम्।
तुल्येऽपराधविभवेऽपि यथा तटस्थः
कस्मैचिदीर्ष्यति जनो न तथाऽपरस्मै॥६॥

किन्तु भगवतो रामानुजस्य चरितविषये अनुरागाधिक्यं कस्य न स्यात्? दृश्यते किलास्य भगवदवतारस्य जीवितसमये सर्वेषामेवेश्वर-कोटिप्रविष्टपुरुषाणां—सर्ववैष्णवदर्शनवादोत्स-स्वरूपस्य श्रीयामुनाचार्यस्य तस्य श्रेष्ठशिष्यत्रयस्य काञ्चीपूर्ण-महापूर्ण-गोष्ठीपूर्ण-संज्ञकस्य च—एष रामानुज एवासीत् परमादरभाजनम् इति। एतस्य महात्मनो जीवनान्त-समये सर्व एव शिष्यप्रशिष्या एतं विहाय जीवनधारणं परमविडम्बना-

रूपममन्यन्त। एतेषां जीवनमीदृशं मधुमयम्, एतेषां रचनं सर्वमीदृशं मधुमयम्, एतस्य महात्मनः कर्मेदृशं फलप्रदं हृदयमस्येदृशं परमौदार्यमयं शिक्षा दीक्षा दानं ध्यानञ्चास्य तथा सुधन्यतमं येन दक्षिणावर्ते वैष्णव-धर्ममहोत्सवेऽस्य जीवनचरितरूपायणं परममधुमयं परमशुभफलप्रद-मित्यनुमीयेत, नात्र कश्चन सन्देहः।

नटी। देव! महातमःपरिवृते कलिहते युगे वङ्गदेशे सर्वदेशसंरक्षणाय सर्वधर्मदर्शन-सभ्यतोन्नतिसंसाधनाय महाजनन्या विष्णुप्रियया सह समवततार स्वयं द्वापरलीलाचतुरो भगवाञ्छ्रीकृष्णः। यो नीलरूपं विहाय गौररूपमवलम्ब्य नाम्ना बभूव गौरहरिरिति। तस्य महाप्रभोरनुपमचरितं जनन्या विष्णुप्रियाया मधुमधुमधुचरितं, महामातुः श्रीश्रीशचीदेव्या मधुमयमपूर्वं महाचरितं वा कथं नाभिनयार्थं प्रकल्पितमेतैर्महाभागैः?

सूत्रधारः। देवि! भागवतधर्मसंप्रचारणविषये प्रथमावतारः किल श्रीरामानुजः। तस्य जन्म च दक्षिणावर्ते। तदस्मिन् प्रथमधर्मावतारस्य भगवतो रामानुजाचार्यस्य माद्राजधाम्नि चरितरूपायणं नितान्तं सुष्ठु परम-सुखावहञ्च। तदिदानीम्

युक्तायुक्ततयोरास्तां विचारोऽङ्गीकृते विधौ।
प्रतिपन्नस्य निर्वाहः कर्तुं सम्प्रति युज्यते॥ ७॥

नटी। तदिदं मया सम्यग् बुद्धम्।

सूत्रधारः। नातः परं विलम्बः करणीयः। महापुण्यक्षणोऽयं नाटक-प्रारम्भणस्य, पुण्यात् पुण्यतरो हि। यतो भगवन्तं श्रीरामानुजं निमेषादेवाध्ययनरतं यादवप्रकाशनिकेतने पश्यामः।

पुण्यायैष न सन्देहस्तीर्थस्थानसमागमः।
परानन्दाय भूयश्च-श्रीपतेर्मुखदर्शनम्॥८॥
अतोऽधिकसुखायैव भक्तश्रेष्ठस्य दर्शनम्।
रामानुजस्य हे देवि! मोक्षस्य प्राप्तिकारणम्॥६॥

देवि! पुरतस्तव पश्य पश्य बाल्ये वयसि पाठाभ्यासरतं श्रीलभगवद्-रामानुजं लक्ष्मणाह्वयम्।

[इति प्रस्तावना]

प्रथमोऽङ्कः

[रामानुज-यादवप्रकाश-संवादः ।]

समयः—मध्याह्नः ।

स्थानम्—काञ्चीपुरस्थ-यादवप्रकाश-शिक्षानिकेतनम् ।

रामानुजः । [यादवप्रकाशस्य पादयुगलं संवाहयन् स्वगतम]

विद्याः सर्वा गुर्वधीना नराणां
रोषस्तस्याशेषविद्यादवाग्निः ।
दिव्यं लोकं वाञ्छताञ्चान्तकाले
गुर्वायत्तः पारलाभो भवाब्धेः ॥१०॥

यादवप्रकाशः । एवमेव जगत् । लक्ष्मण ! जगद्धि परिवर्तनशीला नित्यनश्वरा विराण्मूर्तिरीश्वरस्य । ततः पश्चाद्या सत्ता देशकाल-निमित्तातीता सच्चिदानन्दरूपाऽक्षरा सैव स्वराट् सत्ता, सोपादेया ज्ञेया च । जगत् स्वरूपमीश्वरस्य किन्तु नित्यपरिवर्तनशीलम् ।

[कश्चन शिष्यः । प्रविश्य स्वगतम्—]

अहो कठोरोऽयं मध्याह्नकालः ।

मध्यं मध्याह्नसूर्यो वियत उपगतस्तीक्ष्ण-तीक्ष्णैर्मयूखै-
र्भौमान् सर्वान् पदार्थान् दहन इव दहत्युग्रमूर्तिं प्रपन्नः ।
अस्योग्रा मूर्तिरेषा गुरुगृहवसतिं स्मारयत्यंशतो नः
शिष्यानध्यापकोऽपि ग्लपयति नियतं यद्दुरुक्तेन कामम् ॥११॥

(यादवप्रकाशमुद्दिश्य) देव ! यद्यपि नैष समयः पाठग्रहणस्य तथापि परमकौतूहलाद् भवत्सकाशे दीनातिदीनः शिष्योऽहं समागतोऽस्मि । अस्ति मे प्रश्नविशेषः ।

यादवप्रकाशः । तदनायासं ब्रूहि । कथं सङ्कोचः ? ज्ञानचर्चा-विषये नास्ति समयासमयविचारः ।

शिष्यः। छान्दग्योपनिषदोऽयं मन्त्रांशः "तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" इति मह्यं न सुप्रकटः। तदस्य सत्यार्थं जिज्ञासे।

यादवप्रकाशः। भगवान् शङ्कराचार्यः प्राह—कप्यासं वानरस्य पश्चाद्भागः अपानदेशो वा। ततोऽस्य मन्त्रांशस्यार्थो भवति "तस्य सुवर्णवर्णपुरुषस्य चक्षुर्द्वयं वानरपृष्ठान्तवल्लोहितपद्मतुल्यमि"ति।

रामानुजः। [विमर्षभावं प्रकटय्य स्वगतम्] अहो दौर्भाग्यं मम !

विश्वं विशालं प्रविभाति रम्यं
देवस्य मे यस्य शरीरभासा।
तस्याक्षिणोर्वानरपामराङ्गं नेत्रयो /
साम्यं समाप्नोतु कथं ह्यमेध्यम् ॥१२॥

नैषोऽर्थः कदाचन समीचीनः।

[रामानुजस्य चक्षुर्जलं निर्गलति गुरोः पाददेशे पतति च]

यादवप्रकाशः। अहो ! ज्वलदङ्गारतुल्योत्तप्ताऽश्रुधारा ! [रामानुजम् उद्दिश्य] कथं क्रन्दसि ?

रामानुजः। भगवन् ! भवादृशो महात्मनो मुखादीदृशीं व्याख्यां श्रुत्वा हतचेतन इवास्मि। सर्वकल्याणगुणसम्पन्नस्य निखिलसौन्दर्याकरस्य सच्चिदानन्दविग्रहस्य परात्परस्य भगवतश्चक्षुषा कथं वानरापानदेशस्य तुलना ? पापजनकमेतद्वच इति नात्र संशयलेशो मे।

यादवप्रकाशः। (विरागं प्रकाश्य) अये दम्भोत्स-वत्स ! तव दम्भोऽपि मां करोति नितरां मर्माहतम्। अपि समीचीनतरमर्थमुद्भावयितुं समर्थोऽसि ?

रामानुजः। गुरोराशीर्वादेन सर्वं संभवति।

यादवप्रकाशः। (सोपहासम्) तच्छङ्कराचार्यतोऽपि निपुणतरोऽसि। श्रावय नवीनमर्थम् !

रामानुजः। (सविनयम्) गुरोराशीर्वादबलेन किं न संभवति ! शृणोतु देवः कप्यासस्य मच्चिन्तितमर्थम्। कं पिबतीति कपिः सूर्यः।

असेर्विकसनार्थत्वात् "आस" पदेन विकसितमिति सिध्यति। तेन "कप्यासम्" इति पदस्य समुदितोऽर्थः सूर्यविकसितमिति भवति। तस्मान्मन्त्रांशस्यापि एषोऽर्थः—तस्य सवितृमण्डलमध्यवर्ति-पुरुषस्य चक्षुर्द्वयं सूर्यविकसितपद्मवच्छोभामण्डितमिति।

यादवप्रकाशः। (सविस्मयम् आत्मगतम्)

धन्या मनीषाऽस्य यतः प्रसूते
परैरनाविष्कृत-पूर्वमर्थम्।
पूर्वैः कृतान्नापि न रम्य एष
प्रयाति चेतो न तथापि तृप्तिम् ॥१३॥

(प्रकाशम्) अयि वाचाल लक्ष्मण! एष केवलं गौणार्थो न मुख्यार्थः। तथापि तव व्याख्यानं नैकान्ततः कौशलहीनम्।

शिष्यः। [विमूढ इवेतस्ततो विलोक्य] देव! एतद्भवतोः कथोपकथनं कालान्तरे विचिन्तयिष्यामि, गच्छाम्यहम्। [स्वगतम् –]

श्रुतेः पुराण्या विहितो नवोऽर्थः
प्रशंसनीयोऽपि चिरन्तनार्थात्।
असूयया दूषितचेतसो मे
तिक्तायते पित्तवतः सितेव ॥१४॥ [इति बहिर्गच्छति]

यादवप्रकाशः। (स्वगतम्) अहो! स्वाधीनचिन्ताकुशलोऽयं शिष्यो मे लक्ष्मणकृतस्य व्याख्यानस्य मौलिकत्वं याथार्थ्यं चावश्यमेव निर्धारयिष्यति। वृद्धोऽहं खर्वीकृतोऽस्मि गुणैरनेन बालकेन परममेधाविना चतुरेण च। अहो! सर्वथाऽसहनीयाऽस्य प्रतिभा। दूरमपसारणीय एषः।

यद्यपि पूर्वैरुक्तं शिष्यात् पराजयोऽपि श्रेयानिति।
तदहं न प्रतिपद्ये पराजयान्मृत्युर्वरेण्यः ॥१५॥

[रामानुजमुद्दिश्य] अप्यन्यत्र कदाचन मन्त्रांशव्याख्याने मतानैक्यं त्वया लक्षितम्?

लक्ष्मणः। यदि भगवानधमं शिष्यमेनं क्षन्तुमर्हति, तदा मन्मतं सविनयं ब्रवीमि।

यादवप्रकाशः। (स्वगतम्) दाम्भिकताया मूर्तं रूपमेतन्मे पुरतो विभाति। (लक्ष्मणमुद्दिश्य) - तात! निश्चितमसङ्कोचं ब्रूहि।

लक्ष्मणः। तवाभयदानाच्छङ्कारहितोऽहं ब्रवीमि—

"सत्यं ज्ञानमनन्तं ब्रह्म" इति तैत्तिरीयोपनिषद्व्याख्यानमपि त्वयान्येद्युर्यत् कृतं तत्राप्यास्ते मम महती विप्रतिपत्तिः।

यादवप्रकाशः। (परमोत्कण्ठम्) कथं मतानैक्यम्! ब्रूहि।

लक्ष्मणः। भगवान् व्याख्यातवान् ब्रह्म सत्यस्वरूपं ज्ञानस्वरूपमनन्तस्वरूपं चेति।

यादवप्रकाशः। असावेव तस्य मन्त्रांशस्यार्थनिष्कर्षः। तत्र पुनः कथं मतानैक्यं संभवति।

लक्ष्मणः। मन्मते तु तेन मन्त्रांशेन अस्माभिरेतदेव बोध्यं यद् ब्रह्म सत्यधर्मविशिष्टं नासत्यधर्मपरायणम्; ज्ञानं ब्रह्मणो धर्मो नाज्ञानं अनन्तं ब्रह्म न सान्तमिति। तत् सत्यज्ञानानन्तगुणैः समलङ्कृतं भवति ब्रह्म। एते गुणास्तस्मिन् विद्यन्ते; न तत् सत्यज्ञानानन्तस्वरूपम् इति। यथा देहो मम; नाहं देह इति।

यादवप्रकाशः। (सातिशयरोषपूर्वकम्)—अहे वाचाल लक्ष्मण!

न गुणात्मकमेतत्ते ब्रह्म किन्तु गुणान्वितम्।
अत्र का वा भवेद् युक्तिर्या संशयनिकृन्तनी? ॥१६॥

अथवा तिष्ठतु विचारः, यदि मम व्याख्याने नास्ति ते विश्वासस्तर्हि मत्स्थानादधुनैव बहिर्गच्छ। नाहं त्वत्तः शिक्षां वाञ्छामि। (क्षणं विरम्य)—त्वदुक्तं नैतन्मतं पूर्वसूरिणा केनचित् प्रकटीकृतं तस्मादलीकमेव। भवतु, त्वमन्तर्गच्छ। कञ्चन प्राचीनशिस्यं मत्सकाशे प्रेषय।

लक्ष्मणः। भगवन्! एष गच्छामि। [स्वगतम्]—कष्टं भोः कष्टम्!

प्राचां मार्गेण गच्छन् गुरुरुपनिषदः सम्प्रदायागताना-
मर्थानां पक्षपातात् परिहरति रतिं व्याकृतौ नूतनायाम्।
मद्व्याख्याने नवीने रचयति न पुनर्दोषमल्पञ्च कश्चित्
तत् किं कुर्यां विधातः शरणमिह तथाप्यस्तु गुर्वंघ्रिरेव ॥१७॥

[इत्यन्तर्गच्छति]

[ततः प्रविशति प्राचीनः कश्चन शिष्यः]

यादवप्रकाशः। वत्स! एषोऽद्वैतमतविरोधी लक्ष्मणो मां भृशं व्यथयति। मत्कृत-व्याख्यानेन नितरां तुष्टो मे देशः। कदाचिद् युष्माभिरपि न सूचिता मम प्रमादाशङ्काऽपि। अथ च वाचालोऽयं कान्तिमतीसुतो मम व्याख्यानप्रमादमुद्भावयितुं न भवति पश्चात्पदः।

शिष्यः। देव! अपि न श्रुतं भवता यदनेन "सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रांशमधिकृत्य विरचितः पुस्तकविशेषः, येन साधारणो जनो भवति विचलितः। नायमखण्डब्रह्मवादी, तस्माद् ध्रुवमस्मद्विद्वेष्टाऽसौ।

यादवप्रकाशः। तद् झटित्यस्मात् स्थानाद् विताडनीयोऽसौ।

शिष्यः। देव गुरो! केवलं विताडनेन किम्? स्थानादन्यस्मा-दसौ स्वमतं प्रचारयिष्यति, कालक्रमेण चपलजनानां नेता वा भविष्यति। तदुभयमेवास्माकमहिताय भवेत्।

यादवप्रकाशः। तत् क उपायस्त्वया विविच्यते?

शिष्यः। [अन्तिकमागत्य। कर्णे—एवमेवम्।]

यादवप्रकाशः। अहो भीषणता कल्पनायाः! यया ममापि कठिनमतेः कम्पते हृदयम!

गुर्वादेशवशंवदं विनयिनं वीतच्छलोपप्लवं
शास्त्राभ्यासपरायणं तरुणिमोद्भेदप्रफुल्लाकृतिम्।
शिष्यं लोकपुरस्कृतं कपटतो हन्याद्गुरुश्चेत्तदा
लुप्तः स्याद् गुरुशिष्ययोरनुपमः सम्बन्ध आजानिकः ॥१८॥

तदिदानीं किं करोमि मन्दभाग्यः? (क्षणं चिन्ताकुलः) अथवा सर्वथा मानो रक्षितव्यः। [प्रकाशम्]-सुष्ठु भणितं त्वया। अचिरेण

गच्छामो गङ्गास्नानार्थम्। तत्रैव कौशलेनास्मदभिमतं संसाधनीयम्। नात्र कार्या विचारणा। पुनः—सङ्कल्पितविषयो नान्येषां गोचरीभूतः कर्तव्यः।

शिष्यः। यथादिष्टोऽस्मि, देव! तथा करोमि। (स्वगतम्) —अहो गुरोर्गौरवम्!

मानं स्वीयं रक्षितुं तुच्छतुच्छं
हन्याच्छिष्यं चेद् गुरुर्निर्विचारम्।
पातालं तद् यातु माता धरित्री
स्यादेषा वा दानवानां निवासः ॥१६॥

[उभौ निष्क्रान्तौ ।]

द्वितीयोऽङ्कः

ततः प्रविशतो लक्ष्मण-गोविन्दौ ।

समयः—प्रभातम्।　　　स्थानम्—गोण्डारण्यम्।

लक्ष्मणः। पुरतो भाति विन्ध्याचलपादवर्ति गोण्डारण्यम्। विरलजनसञ्चारं स्थानमेतत् तथापि प्रकृतेर्लीलाविस्तारात् परमं मनोरमं प्रतीयते।

प्रवहति शिखराग्रान्निर्झरोऽयं पुरस्ता-
दयमिह मृगशावः प्राप्तवान् पातुमम्भः।
विशति न तरुषण्डच्छादितायामटव्या-
मिह मिहिरमयूखः क्षीणदीप्तिः प्रभाते ॥२०॥

हन्त! अकामेनैव मया तदानीमुपार्जितो गुरुविद्वेषः। न च ममासीद् गत्यन्तरम्। गुरुणा पृष्टः स्वाभिमतमुपनिषद्व्याख्यानं तस्मै निवेदितम् इत्येष मेऽपराधः, अहो!

गुरोस्तदानीन्तनभ्रास्यलग्नो
जागर्ति मे चेतसि रूक्षभावः।
अत्याहितं सन्निहितं महन्मे
ब्रूते मनोऽनागततत्त्वदर्शि ॥२१॥

तथापि गुरोरयं धर्मानुरागः सर्वथा प्रशंसनीयः। यदेष—

सुदूर-काञ्चीपुरतः स्वदेशा-
दतीत्य दीर्घां सरणिं सुदुर्गाम्।
समागतो विन्ध्यनगोपकण्ठे
विगाहितुं दैवतशैवलिन्याम् ॥२२॥

गोविन्दः। अलमलीकप्रशंसया। गुरोस्ते धर्माचरणमर्मकथा मया सम्यग् ज्ञाता। तद् ब्रवीमि—भ्रातः! महती विपद् वदनव्यादानं कृत्वा पुरतस्ते समुपस्थिता। एषा तीर्थयात्रा यादवप्रकाशस्य न पुण्योपार्जनाय, परन्तु तत्र वधसाधनायैवेति निश्चितं जानीहि। जनविरले स्थानेऽस्मिन् तव निधनं संसाधनीयमित्येषां यादवप्रकाशशिष्याणां मिथ आलपनं मया श्रुतम्। कुरु यथाविहितम्। न पुनः कदापि शिष्यगोष्ठ्यामायाहि। तदितः पलायनं तव श्रेयः।

लक्ष्मणः। भो भ्रातः! यद्यपि—

गुरोरसूयामलिनस्य जानता
जिघांसया घोरकदर्यमन्तरम्।
पुनर्विधातुं वसतिं तदन्तिके
मया विधेयं न कदापि साहसम् ॥२३॥

तथापि भीतिर्नाम मनुष्याणां कापुरुषताव्यञ्जिका। कथमहं पलायिष्ये?

गोविन्दः। अग्रज! क्षेत्रमक्षेत्रञ्च संविविच्य साहसिकता प्रकटनीया। ध्रुवं विज्ञायाकारणमृत्युं न कोऽपि साहसिकतां प्रकटयेत्।

तत्— धनादि यद् यत् तव तत्र विद्यते
परित्यजाशां निखिलेषु तेष्वपि ।
स्मरन् हृदब्जे चरणं जगत्पितु-
र्दिशे बतास्यै नियतं नमस्कुरु ॥२४॥

कुरु पलायनमचिरात् । यद्यपि त्वया सह ममापि गमनमेकान्ततोऽपेक्षितं तथाप्येतेषां संशयविदूरणार्थम् अहमत्र स्थास्यामि । तस्मिन्नवसरे त्वं बहुयोजनान्यतिक्रमिष्यसि ।

लक्ष्मणः । अहो ! मम विवेकोऽपि समुद्घोषयति मयैतेषां सङ्गः परित्यक्तव्य इति । भगवान् मम सहायो भवतु । भ्रातः ! त्वद्वचनानुसारेण याम्यहं काञ्चीपुरं प्रति । (सबाष्पम्—)

मातृष्वसेयेन कनीयसा त्वया
क्रीडाशनादीनि सहैव कुर्वता ।
कालो मया यद् विपुलोऽतिवाहित
आरूढदीर्घप्रणयेन तत् स्मर ॥२५॥

गोविन्दः । भ्रातः !

करान् प्रकीर्यातिखराननन्तं
दिवाकरः क्रामति चण्डतेजाः ।
इतो हता यादवशिष्यसङ्घा
वधेच्छया ते परितश्चरन्ति ॥२६॥

तदग्रज ! सावधानं गच्छ स्थानान्तरम् ।

मातर्दुर्गतिमति ! मातृष्वसः कान्तिमति ! मातामह केशव ! युष्माकं सर्वेषाम् आशिषः प्रार्थये यथा पिशाचा अकारणहिंसापरवशा यादवप्रकाशशिष्या अस्य रामानुजसदृशस्य लक्ष्मणभ्रातृवर्यस्य मे केशाग्रमपि न स्पृशेयुरिति ।

लक्ष्मीनारायणौ ! संरक्षणकारणं युवामेव । अयं मम भ्राता लक्ष्मणो हिंसाद्वेषकालुष्यरहितः सततं युष्मद्भक्तो यथा न विपद्येत, तदर्थं युवयोरनुकम्पां प्रार्थये । भो हरे हरिदयिते च !

गाढं समाराध्य पदद्वयं वां
जातोऽद्य यः कीकसचर्मसारः।
घोरे वने घातुकगोचरं तं
संरक्षतं वां चरणावलम्बम् ॥२७॥ [इति रोदिति ।]

लक्ष्मणः। भ्रातः! मा रुदिहि, भगवानेव सर्वदा सहायो विपन्नानाम्। विश्वसंरक्षकोऽसौ तव चित्तशान्तिं विदधातु। स्थानादस्मादन्तर्हितो भवामि।

[उभौ निष्क्रान्तौ]

———

तृतीयोऽङ्कः

[रामानुज-व्याधदम्पतिसंवादः]

समयः—प्रातः।　　　स्थानम्—घोरकाननस्थलम्।

[ततः प्रविशति चिन्ताक्लिष्टो लक्ष्मणः]

लक्ष्मणः। अहो तृष्णार्ता मे जननी परमकरुणामयीयं व्याधपत्नी। घोरे काननेऽस्मिन् एषा मह्यमाश्रयं दत्तवती, अथचाहं तस्यास्तृष्णालवमपि दूरीकर्तुं न शक्नोमीत्यहो घोरो विषादो दुरपनेयो मम चित्तस्य। कीदृशं विधानमेतद्विधातुः? पुत्रो भूत्वा मातुः पिपासालेशमपि निवारयितुं नास्मि समर्थः। कुत्र वा वापी? कुत्र वा जलं, कुत्र वा स्थितोऽस्मि किमपि न जाने।

[नेपथ्ये व्याधपत्नी] अहो भृशं तृष्णार्तास्मि। क इदानीमपनोदयतु मम तृष्णाम्। जलाभावान्नाहं प्राणान् धारयेयम्। अपि निखिले विश्वे कोऽपि नास्ति यो मम तृष्णां दूरीकर्तुं समर्थः? अपि न कोऽपि?

लक्ष्मणः। मातः! अत्राऽस्मि परं समुत्कण्ठितो भवत्याः पिपासानिवारणाय। सलिलमन्वेष्टुं बहिर्यामि, अचिरादेव पुनरावर्तिष्ये। हन्त भोः!

देशो नदीमातृक एष यद्यपि
क्वापि प्रलोके न तथापि किं जलम्।
यद्वा ममाधन्यतयैव पापिनो
जातोऽस्ति देशः सजलोऽप्यसौ मरुः ॥२८॥

अहो! अदूरे पश्यामि काञ्चन वापीम्। अथवा किमयं मे मनसो भ्रमः?

हंहो विगते दिवसे नापश्यमत्र गर्तमपि क्षुद्रम्।
पुनरद्य भाग्यवशेन संदृश्यते प्रफुल्लः सरोवरः ॥२६॥

तद् यावदुपसर्पामि। (उपसृत्य) सत्यं सरोवर एव। (व्याधपत्नीमुद्दिश्य)

मातः! तदायातु भवती। अहमञ्जलिपूरं जलं सोपानावली-मतिक्रम्यानेष्यामि। तत् पीत्वा भवती स्वस्था भवतु।

[व्याधपत्नी व्याधश्च प्रविशतः]

व्याधपत्नी। (लक्ष्मणमुद्दिश्य)—पुत्र! तव मातृभक्तिर्मह्यं ददात्यभिनवमानन्दम्। प्राथम्येन तृष्णार्ताया जनन्याः पिपासां दूरी-कुरु।

लक्ष्मणः। तथा करोमि मातः (प्रस्थितः)।

व्याधः। अहो सर्वसत्त्वगुणधामापूर्वोऽयं गुणनिधिः। अस्य साहाय्येन मसीसमाच्छन्नं जगद्भविष्यति विगतकलुषम्। नाम्ना लक्ष्मणः सत्यमेवैष रामानुजो लक्ष्मणः भक्त्या प्रीत्या च जगतः सर्वं कालुष्यं विदूरीकरिष्यति।

व्याधपत्नी। अहो अतुलनीयमस्य हृदयसरोजं कोमलं सर्वजनहित-साधनाभावनासमुज्ज्वलम्। ईदृश एव सुतो मातुः सर्वकुलमुज्ज्वलीकरोति।

[लक्ष्मणस्तोयपूर्णाञ्जलिः प्रविशति]

लक्ष्मणः। मातः! त्वरितं गृह्णातु भवती मदर्थमानीतमिदं जलम्। परमस्वादु सुशोभनमेतन्मम मातुः पिपासां करोतु दूराम्। गृहाण मातः! पिब वारि।

व्याधः। अनेन मातृभक्तिदर्शनेन त्वं जगतः सर्वथा वन्दनीयो भविष्यसि। यथा नारायणस्तथा लक्ष्मीः, अथवा लक्ष्मीस्तदधिका, जगतः सर्वथा लालनपालनभरणपोषणात्। मातुः पिपासादूरीकरण-प्रयत्नेन सर्वथा हृष्टोऽस्मि। मातृपूजापरायणस्य तव कल्याणं भवतु शाश्वतम्। तात लक्ष्मण! मातृपूजाप्रचारणाऽपि भवतु तव जीवन-व्रतम्। तत्र लभस्व च विजयम्।

मानो यो जननीजने प्रकटितो यश्चादरो दर्शितः
स्नेहो भक्तिपुरस्कृतश्च विहितो यस्तेन तेनाम्बिका।
सन्तुष्टा वितनोतु तुभ्यमिह यत् पुंसामभीष्टं यशो
देहान्ते च परं पदं भगवतो विष्णोर्महाभास्वरम्॥ ३०॥

लक्ष्मणः। पितः! अनेन वरेण धन्योऽस्मि। किन्तु जनन्याः पिपासा निवारिता किम्? पुनरप्यानेष्यामि जलम्? अहो नास्ति मम पात्रम्; अञ्जलिदत्ततोयेन कथं स्यान्मातुस्तृष्णा निवारिता?

व्याधपत्नी। पुत्र! तव हृदयस्य सुन्दरसारल्यं मातुः सेवोत्कण्ठा च मम तृष्णां दूरीकरोति। श्रीलक्ष्मीनारायणसेवाचिह्नितो भगवदनु-गृहीतो जनोऽसि त्वम्। अथवा भगवदवताररूपोऽसि। स त्वं विजयी भव।

तीक्ष्णा ते प्रतिभा पुत्र शास्त्रेषु क्रमतां चिरम्।
प्रतिविद्याविवादं त्वं जयलक्ष्म्याः पतिर्भव॥ ३१॥

लक्ष्मणः। पुनरपि भवदर्थमानेष्यामि जलम्। मद्दत्ततोयेन भवतु मातुस्तृष्णा निवारिता।

[लक्ष्मणो बहिर्गतः। व्याधदम्पती चान्तर्धत्तः]

लक्ष्मणः। (जलपूर्णाञ्जलिः प्रविश्य)—मातः! मातः! कुत्राऽसि? गभीरे काननेऽस्मिन् दत्ताश्रयं मां कथं त्यजसि? मुहूर्तेन वैताभ्यां कुत्र गतम्?

अहो सम्पूर्णं बुद्धम्। आभ्यां मातापितृभ्यां जगतो भवितव्यम्। अहो हतभाग्योऽस्मि।

आगस्विनो गुरुषु मे किमु वञ्चनार्थौ
जातौ त्रिलोकपितरावितराकृतिस्थौ ?
न प्राकृतौ बत वनेचरदम्पती तौ
प्राप्तो निधिर्विघटितो दुरदृष्टयोगात्॥ ३२॥

[इति निष्क्रान्तः।]

चतुर्थोऽङ्कः

[रामानुजस्य माता कान्तिमती पूजापरायणा प्रविशति]

कान्तिमती। (ध्यायन्ती)

नमो नारायणाय श्रीश्रीमुकुन्दाय विष्णवे।
मुरहराय कृष्णाय गोविन्दाय नमो नमः ॥३३॥
नमः श्रीकमलाक्षाय नमः पङ्कजमालिने।
नमः सरोजनाभाय नमः पद्माङ्घ्रिधारिणे ॥३४॥

देवदेव! मधु विद्यते विपदाम्, यतो विपद्येव वयं पश्यामस्त्वन्मुखम्। न धनेन न जनेन न वोपायान्तरेण, केवलं भक्त्यैवासि त्वं चिरलभनीयः।

पितः! बहिर्गतो मम पुत्रो यत्र तत्र वा तिष्ठतु, यथा तथा वा विचरतु—भक्तिमहैतुकीं तस्मै देहि। तव भक्तस्य का वा विपद्। त्वत्कृपया सर्वा विपदन्ते याति लोपम्। पुत्रं मम तवाङ्केऽहं निधाय चिरकल्याणं प्रार्थये, ममाश्वज्ञनिधि-पुत्रस्य हृदयं भक्तिमधुपूरितं कुरु। काऽगच्छति ?

(रामानुजस्य मातृष्वसा दीप्तिमती प्रविशति)

दीप्तिमती। अग्रजे पुण्यगङ्गास्नानाय दूरदेशं गतौ पुत्रौ; किन्तु मनो मे न शान्तिमाधत्ते नूनं तयोः काचिद् विपदुपस्थिता। यतो विधातुर्विधानेन मातृमनः प्रायेण पुत्रविषयि सर्वमेवानुक्षणं जानाति।

कान्तिमती। अथवैष प्रेमधर्म एव। मातुः स्नेहप्रेमाभ्यधिकत्वान्माता सर्वमेवार्हति ज्ञातुम्। एवं जानाति भगवान् सर्वभक्तहृदयव्यथां भक्तानां विपदश्च। तदनुजे! मा शोकं कार्षीः, सर्वनियन्ता भगवान् सर्वविपद्भञ्जनकारणञ्च।

दीप्तिमती। आर्ये! सर्वं विजानत्यपि नाहमात्मानं प्रशमयितुं शक्नोमि। किन्तु त्वमस्यशेषभगवत्करुणोद्दीप्ता शान्ता समाहिता च, यतः सर्वमेव दुःखं जायते भवत्याः सहनयोग्यम्। सत्यं त्वमसि धन्याऽग्रजे।

कान्तिमती। दीप्तिमति! मम स्नेहभाजनानुजे! यतो भगवानेव निखिलजनशरणम् अतस्तस्मिन् सर्वसमर्पणं विना नान्या गतिरस्माकम्। पश्य,

बालः पित्रोर्विनिहितभरः सर्वचेष्टाविहीनः
शेते यद्वद् भगवति तथा वर्तितव्यं जनेन।
एवं देवः परमकरुणः सेवकं स्वैकनिष्ठं
काष्ठामाप्तं भजनसरणेर्योजयेद् वाञ्छितार्थैः॥३५॥

दीप्तिमती। मनो मे कथयति यद् विपन्नं पुत्रद्वयं तव तपस्यापुण्यफलेन सद्यो विपन्मुक्तम् इति। यतोऽभ्यन्तरदेशो जायते संफुल्ल इव। निरन्तरं पश्यामीव लक्ष्मणस्य गोविन्दस्य च वदनकमलद्वयम्। क इत आयाति?

(ततः प्रविशति लक्ष्मणः)

लक्ष्मणः। (उद्भ्रान्त इव) मातः! मातृष्वसः! सत्यं युवामत्र तिष्ठतः? कस्माद्वाऽत्र समागते युवाम्? (स्वगतम्) अहो! तत्र खलु गोण्डारण्ये—

अनुपदं मम मीन-सधर्मणा-
श्चलति यादवमाणवके वके।
अकुरुतामिह मां विपदुज्झितं
करुणया विपिनेचरदम्पती ॥३६॥

(प्रकाशम्) अहो सर्वथा दुरत्ययाऽसीत् सा विपद्।

दुग्धतिमती। सत्यं खलु न्वेष लक्ष्मणः ?

कान्तिमती। किन्तु का वा विपद् ? कथं वा झटित्यत्रागतः ?

लक्ष्मणः। स्वल्पकालात् पुनर्लक्ष्मीनारायणौ मम मातापितृरूपेण मत्समक्षं समागत्य विपत्समुद्रान्मामुद्धृतवन्तौ। अहो करुणा!
(इति मुह्यति)

कान्तिमती। कुत्र वा गोविन्दः ! सह गतावुभौ। एक एव प्रत्यागतः, अन्यः कुत्र वा ?

दुग्धतिमती। झटिति जलसेचनं कुरु। क्षतविक्षतचरणोऽसौ घन-वनस्थल्या अत्रागतवान्।

पूर्वासञ्जित-शात्रवेण सरुषा सन्त्रासितः केनचिज्-
जातोऽयं बत कण्टकक्षतवपुर्वन्येन धावन् पथा।
निर्गच्छद्भिरसृक्कणैः क्षतमुखादस्येन्द्रगोपप्रभैः
कायः पुष्पितकिंशुकप्रतिभटः संशोभितो राजते ॥ ३७ ॥

तथापि—

क्षतनिखिलशरीरः प्राणमात्रावशेषोऽ-
प्ययमिह यदुपेतो मत्समीपे कथञ्चित्।
निरवधिमनुकम्पामैश्वरीं तद् विचिन्त्य
प्रणिपतति शिरो मे पादयोरीश्वरस्य ॥ ३८ ॥

भगवन्! वत्सस्य मे मूर्छा त्वरितं यातु दूरम्। (इति स्नेहकरविलेपनं करोति)। अहो! आनन्दप्रकर्षः! पुत्रस्य मम मूर्छाभङ्गो जातः। (धीरं लक्ष्मणश्चक्षुरुन्मीलति)

लक्ष्मणः । अहो मातुः स्नेहमयः करस्पर्शः !

विषाक्ते खलु संसारे जननीकरुणामृतम् ।
प्रोज्जीवयति सन्तानं विपन्नं विषवेगतः ॥ ३६ ॥

कान्तिमती । (लक्ष्मणमुद्दिश्य) वत्स लक्ष्मण! कुत्र तव भ्राता भगिन्या मे वत्साञ्चलैकनिधिः श्रीमान् गोविन्दः ?

लक्ष्मणः । मातर्मातृष्वसश्च ! भ्राता गोविन्दो मत्प्राणरक्षार्थी तत्रैव विपद्यमान आस्ते इति मे सन्देहः ।

दीप्तिमती । तव प्राणरक्षार्थी ? अपि यादवप्रकाशेन सह विवादः संघटितः ?

लक्ष्मणः । मातृष्वसः !

मतानैक्यं विरोधो वा गुरुणा न सुखावहः ।
इतीवासीद् विपन्नं मे जीवनं विधिवाञ्छया ॥ ३६ ॥

भ्रातुर्गोविन्दस्यानुकूल्येन श्रियः श्रीपतेश्चानुकम्पयान्ततः सर्वा विपदपगता । मातृसमे ! तदलमतिविस्तारेण । प्रार्थये भवत्योराशीर्वादम् ।

(सर्वे निष्क्रान्ताः ।)

पञ्चमोऽङ्कः

स्थानम् —यादवप्रकाशगृह-सन्निहितः पन्थाः ।

(ततः प्रविशति आलवान्दारो यामुनाचार्यः सशिष्यः)

यामुनाचार्यः । मम शाश्वतानन्दकारण शिष्यगण ! परमशान्तिधाम दर्शनसुखश्चायं दक्षिणावर्तभूभागः । अत्र हि,

गोदावरी वरयतीव नरान् स्वरेतुं
कृष्णाप्यकृष्णचरितं कुरुतेऽभिषेकात् ।
सम्पादयत्यखिल-वाञ्छितमेव पम्पा
कावेर्यपि प्रवरवैरभयं भिनत्ति ॥४०॥

किञ्च, युगे युगेऽत्र प्रादुर्बभूवुर्महान्तो दार्शनिकाः। तथापि हृदयं मम व्यथते यत् प्रकृतशास्त्रार्थो देशवासिभ्यो नाद्यापि केनापि प्रकटीकृतः। पश्य,

आविर्भूताः प्रतियुगमिहानेकविद्वन्मृगेन्द्राः
शास्त्रव्याख्याः स्वरुचिसदृशीस्तेनिरे सर्व एव।
एताः साधारणजनमनस्तोषणे व्यर्थकामा
दीर्घान् कालान् विफलजनुषोऽध्यासत ग्रन्थशय्याम् ॥४१॥

कुत इति चेत्,

वर्षेऽस्मिन् भारताख्ये बहुसुकृतिवशाच्छैशवादेव लोकः
श्रुत्वैवाप्ताननेभ्यो भवति परिचितः सेतिहासैः पुराणैः।
अत्रत्यांश्चेश-भक्ति-द्वितयविलसितान् रोचयन् रम्यभावान्
अद्वैतब्रह्मवादे गुरुभिरनुसृते नैव बध्नाति चेतः॥४२॥

निर्विशेषं यदेकत्वं तत्त्वं वेदस्य वर्ण्यते।
तन्न स्पृशति लोकानां मानसं द्वैतभावितम् ॥४३॥

आचार्येण कृतास्ति या तु विवृतिर्वेदान्तविश्लेषणी
सास्माकं रुचिभेदतो न हि मनस्तोषाय सम्पद्यते।
व्याख्या काचिदतो नवीनसरणीसञ्चारिणी काम्यते
सेयं केन कदा क्व वा विरचिता स्यात्तन्न विज्ञायते ॥३४॥

(ध्यानं नाटयन्) को वा तत्रभवान् महात्मा क्व वा सांप्रतं विद्यते यो ब्रह्मजीवजगत्प्रकृतसंपर्कं सर्वमानवेभ्यो विशदीकरिष्यति ?

शिष्यगणः। एवं कृते जगतो महान् उपकारः स्यात्।

यामुनाचार्यः। मनो मे कथयति, साम्प्रतमसौ सुलभदर्शन इति। (यादवप्रकाशमण्डपे दूरतो रामानुजं दृष्ट्वा) अहो कोऽयमत्रापूर्वदर्शनः सर्वमनोरञ्जनोऽगाधसत्त्वो जनो यादवप्रकाशसामीप्याद् राहुग्रस्तश्चन्द्र इव राजते ? अथवा,

यद् यस्याकृत्रिमं सत्त्वं न तत् प्रच्छाद्यते क्वचित्।
पटेन पिहितस्यापि दीप्तिः स्वर्णस्य दुर्जया ॥४५॥

शिष्यगण ! अपि युष्माकं परिचितोऽयं जनः ?

शिष्याणामन्यतमः । देव ! नाम्ना लक्ष्मणोऽयं परममेधावी यादवप्रकाशस्य शिष्योऽपि गुरुणा महान्तं दर्शनभेदवादं हृदये पुष्णन् वेदनाक्षुब्धहृदयस्तत्रास्त इत्यस्माभिर्ज्ञायते किल ।

यामुनाचार्यः । (निपुणं पर्यवेक्षमाणः) अहो असावेव जनो मम चिरापेक्षितव्याख्याविधाने दक्षः स्यादिति मे प्रतिभाति । यद्यपि यादवप्रकाशसन्निहितत्वादसौ स्तिमितप्रभावो विद्यते तथापि—

आलोकमात्रेण मयावधारितं
सोऽयं जनो यो जगतो हिताप्तये ।
कालेन जातं बलिना मलीमसं
वेदान्ततत्त्वं विमलीकरिष्यति ।।४६।।

तत् प्रार्थये—

"यस्य प्रसादकलया बधिरः शृणोति
पङ्गुः प्रधावति जवेन च वक्ति मूकः ।
अन्धः प्रपश्यति सुतं लभते च बन्ध्या
तं देवमेव वरदं शरणं गतोऽस्मि ।।
लक्ष्मीश पुण्डरीकाक्ष कृपां रामानुजे तव ।
निधाय स्वमते नाथ प्रविष्टं कर्तुमर्हसि ।।"

भोः शिष्यगण ! एनमेतदवस्थं परित्यज्य वयं साम्प्रतं गच्छामः श्रीरङ्गम् । अहो ! श्रीरामानुज इत एवागच्छति ।

समुन्नतललाटोऽयं समुज्ज्वलमुखच्छविः ।
शून्यदृष्टिः समायाति भावावेशादिवेश्वरे ।।४७

भगवान् भवतु श्रीरामानुजसहायः ।

(निर्गतः सशिष्यो यामुनाचार्यः)

(प्रविशति श्रीरामानुजो भगवद्ध्यानतत्परः)

रामानुजः । भगवन् विष्णो ! क इव तवाभिप्रायो यद् विज्ञाय सर्वं विगतवृत्तान्तं, यादवप्रकाशेन मम जीवननाशोद्योगमपि, मां विद्यालाभ-

व्यपदेशेन तस्यैव शिक्षानिकेतने संस्थाप्य लभसे मोदम्? अस्य गुरोरद्वैतवादव्याख्यानप्रपञ्चो न मह्यं रोचते। तथापि सर्वमेतन्मया सोढं स्थानान्तरेऽध्ययनसुयोगलाभाभावात्।

अथवाऽदृष्टविलिखनखण्डने को भवेत् समर्थः?

मय्यप्रसन्नस्य गुरोश्चिकीर्षितम्
उत्प्रेक्षमाणोऽप्यशिवं क्षणे क्षणे।
शिक्षानिकेतं न जहाम्यहं कथं
जानाति तत् केवलमिष्टदेवता ॥४८॥

(ततः प्रविशति कश्चन यादवप्रकाशशिष्यः)

यादवप्रकाशशिष्यः। भ्रातर्लक्ष्मण! काञ्चीपुरराजकुमारी ब्रह्मराक्षसग्रस्ता गुरुवरेण श्रीयादवप्रकाशेन चिकित्सनीयास्ते। किन्तु सा राजकुमारी गुरुवरं प्राह—भो यादव! तव मन्त्रादिकमत्र न किञ्चन फलं सोष्यते; अतो गच्छ स्वगृहं; निरर्थकप्रयत्नेन किम्?

वितरोपनिषद्विद्यां कृतविकृतव्याख्यां चिरमज्ञेभ्यः।
अलमतिसाहसरसेन येनान्ते विपदि पदं निधास्यसि ॥४९॥

रामानुजः। (स्वगतम्) अहो आनन्दो मे! यन्न केवलमहमेव, अन्ततः काचन जनन्यपि जानाति गुरोर्मे वेदान्तव्याख्याविक्रमम्। किन्तु

समवेदवरोधवर्तिनी कथमेषा चरितं गुरोर्मम।
नियतं ह्यतिमानवस्य तन् नृपपुत्रीमधितिष्ठतः क्रिया ॥५०॥

(प्रकाशम्) ततस्ततः।

शिष्यः। श्रुत्वाऽपि तद्वचः श्रीयादवप्रकाशगुरुदेवो बहुधा बहुकालं प्रयतते स्म; किन्तु मुधाजायत सर्वः प्रयत्नः। ब्रह्मराक्षसः पुनस्तं संबोध्य प्राह।

रामानुजः। किं प्राह?

शिष्यः। कथं मिथ्या यतसे? हीनबलेन त्वया नाहं बलाधिकः कदापि करणीयः स्थानच्युतः।

यदि किल वाञ्छसि सुखस्पर्शायाः कोमलाङ्ग्या राजकन्यकाया

देहमन्दिरान्ममापसारणं तर्हि तव शिष्येषु वयःकनिष्ठम् आजानुलम्बित-बाहुं प्रशान्तललाटमायतचक्षुषं प्रतिभादेवीविलासभूमिं यौवनोद्यान-सर्वोत्कृष्टकुसुमं माधुर्यैकनिलयं श्रीमन्तं श्रीरामानुजमत्रानय। घनामानिशानिबिडान्धकारो यथापैति सूर्यदेवस्योदयात्तथाऽहं तस्य समागमनादस्मात् स्थानाद्यास्यामि। शृणु मे सावशेषं वचनम्—

समोपदेशं शिवदं तवैव विलङ्घ्य चेन्मे कदनं चिकीर्षेः।
विहाय बालां वसुधापतेस्तत् समाश्रयिष्येऽद्य भवन्तमेव ।।५१।।

रामानुजः। अपि स्वयं गुरुदेवो मां तत्र गमनायादिशत् ?

शिष्यः। अथ किम् ?

रामानुजः। तन्मयाऽवश्यमेव गन्तव्यम्। पुनश्च जनसेवा मे जीवनव्रतम्। ततोऽपि यदि माता काचन विपद्येत। भारतवर्षीय-शास्त्राणामेतदेवानुशासनं यत् सर्वा नार्यो विश्वमातुरंशीभूतास्तद्वत् पूजनीयाश्चेति। भ्रातरवश्यमेव गच्छामि। एहि, एहि।

(श्रीश्रीविष्णुं लक्ष्मीञ्च प्रार्थयते)

अन्वर्थं नाम धत्से जगदिदमखिलं व्याप्नुवन् देव विष्णो !
जीवास्ते यन्त्रमात्रं निजमभिलषितं साधयस्यन्वहं तैः।
हे दीनानाथबन्धो तदयमुपनतो ब्रह्मरक्षोऽपसारः
सम्पाद्यो मे यथा स्याद् वितर करुणया तादृशं शक्तिसारम् ।।५२।।

मातर्लक्ष्मि ! पतिस्तवास्ति भगवान् विष्णुस्तदस्यानुगा
देवि ! त्वं, न ततः पृथग् भगवती याच्या मया मन्यते।
किन्त्वेतत् स्मर, सन्ततेरुभयतः सम्बन्धसाम्येऽप्यहो
मातर्येव सुतः करोति सुतरां स्वाभीष्टसिद्धौ भरम् ।।५३।।

तत् त्वयाम्ब समं पत्या करुणाकोमलात्मना।
सङ्कटे समुपस्थाय मानो मे परिरक्ष्यताम् ।।५४।।

(निष्क्रान्तौ।)

षष्ठोऽङ्कः

[ब्रह्मराक्षसापनयनं गुरुणा पुनर्मतविरोधश्च]

स्थानम्—राजप्रासादः ।

(ततः प्रविशति सतीर्थ्येन श्रीरामानुजः । अन्यतस्तिष्ठन्ति ब्रह्मराक्षसग्रस्ता राजकुमारी, यादवप्रकाशोऽन्ये च केचन राजपरिवाराः ।)

रामानुजः । (गुरुं प्रणम्य) नमो गुरवे नमो भगवते श्रीविष्णवे । (ध्यायन्)—

भगवन् कृपासिन्धो श्रीहरे! परमसुशोभनं जगदिदं समग्रभूतजातमेलनेन सुशोभनतरं जातम्। यथा बीजाद् अङ्कुरोत्पत्तिः अङ्कुराच्च महामहीरुहे परिणतिः, तद्वत् त्वत्तो जातमिदं विश्वं प्रपञ्चेन सर्वं परिदृष्टं त्वत्स्नेहपुष्टं राजतेतराम्। जगदम्बिके जगल्लक्ष्मि! त्वमसि जगद्धरणपरा जगद्धात्री। तुभ्यञ्चाकिञ्चनस्य तनयस्य कोटिप्रणामाः ।

यादवप्रकाशः । स्वस्ति मम कनिष्ठशिष्याय रामानुजाय। तात!

भूतः कश्चिद् राजपुत्रीं प्रपन्नः
पीडामस्याः सन्ततं सन्तनोति ।
त्वञ्चेदेनां त्रायसे सुप्रसन्नः
ख्यातः स्यान्मे शिष्यसौभाग्यभूमा ॥५५॥

अत एतत् सुष्ठु भणितम्—

"सर्वत्र जयमन्विच्छेत् पुत्राच्छिष्यात् पराजयम्" इति ।

रामानुजः । देव! गुरौ स्वयं तिष्ठति कथं शिष्यकरप्रसारः ?

उत्सङ्गे सति पश्चाङ्गे का रतिर्भित्तिपत्रके ।
द्विजाग्रेय गृहकोणस्थे यजेतावरजैस्तु कः ॥५६॥

तथापि भवदाज्ञां पालयिष्ये ।

राजकुमार्यधिष्ठाता ब्रह्मराक्षसः। अये! धीमन् । ममानुरोधक्रमेण भवानत्रानीतोऽस्ति। तत् सत्यं भणामि—

यदि वाञ्छसि मामपसारयितुं
प्रसभं नृपतेस्तनयातनुतः ।
कुरुतां चरणौ मम मूर्ध्नि भवान्
इति मे विनयाञ्जलिरानमतः ॥५७॥

रामानुजः । (गुरुमुद्दिश्य) भवत आदेशं प्रार्थये ।

यादवप्रकाशः । निश्चितं राजकुमारीं व्याधिहीनां कुरु ।

रामानुजः । तथा भवतु ।

हे ब्रह्मराक्षस ! त्वमपि भव ब्रह्मकृपाभाजनम् । स्थावरजङ्गमाः सर्वे यस्य मित्राणि, तस्य विश्वमित्रस्य कृपां भजस्व । नितरां सुखी भव ।

एनां त्वदावेशकृशाङ्गयष्टिं
भूमीन्द्रपुत्रीं परिहृत्य याहि ।
किञ्च स्वनिर्याणविशेषलिङ्ग-
मश्वत्थशाखादलनं विधेहि ॥५८॥

ब्रह्मराक्षसः । तथास्तु भद्र !

(दूरे अश्वत्थवृक्षशाखाभङ्गशब्दः शाखायाः पतनञ्च)

सर्वे । अहो पश्य पश्य, अश्वत्थवृक्षः कथं कम्पते । शाखा चैका भग्नाऽधः पतिता । तद्ध्रुवं दूरमपसृतो ब्रह्मराक्षसः । अहो आनन्दः ।

(नेपथ्याद् ब्रह्मराक्षसः ।) पुनरेषोऽपि ममानन्दः—राजकुमारीयं श्रीलरामानुजकृपया समुद्धृता । यादवप्रकाशस्य नासीच्छक्तिः । श्रीरामानुजसाधना विद्योततां, श्रीरामानुजस्य जगच्छुभकामना प्रस्फुरतु, भगवान् भवतु सर्वेषां सहायः ।

शिष्यः कश्चन । गुरुवरस्य शक्तिर्नासीत् । रामानुजस्य कृपया सर्वं हितं संसाधितं गुरुणा । अहो रामानुजस्य प्रज्ञाप्रकर्षः ।

गुरुर्ममाद्य प्रतिभाति यादव-प्रकाश एषोऽवयवैर्न विद्यया ।
विद्या नृणामाप इवाश्रयान्ययान्मालिन्यमायान्त्यपि निर्मलाः क्वचित्
॥५९॥

यादवप्रकाशः। (कपटं विहस्य) पश्यत सर्वे! मम्मादेश-क्रमेणैतत् सर्वं संघटितम्। ब्रह्मराक्षसस्योपदेशो यथा, तथा तस्यान्तिम-वाणी च। सर्वं मम साधनफलम्। रामानुजस्य हितं चाहं कामये।

राजकुमारी। (चैतन्यमापन्ना) अहो! कथमहमत्रानीतास्मि? मां कक्षाभ्यन्तरं नय।

(सा कक्षान्तर्नीता)

शिष्यः। गुरुदेव! भवतोऽस्य विषयस्यावशेषं श्रोतुमिच्छामि। शास्त्रवाक्यैः सह सामञ्जस्यमस्य वृत्तस्य विधीयताम्।

यादवप्रकाशः। साधु तात साधु! श्रूयताम्। छान्दोग्योपनिषदि—"सर्वं खल्विदं ब्रह्म" इति। पुनः कठोपनिषदि—"नेह नानास्ति किञ्चन" इति। अनेन ब्रह्मण आत्मनश्चैक्यं प्रतिपाद्यते। आत्मा ब्रह्म। सर्वे जीवाश्च ब्रह्मस्वरूपाः। जीवजगतो ब्रह्मणश्च न भेदः।

रामानुजः। (स्वगतम्) अहो तदेव पुनरपव्याख्यानं शास्त्र-वाक्यस्य! यथा तथा वा भवतु स्वमतं निश्चितमहं विज्ञापयिष्ये। (गुरुं यादवप्रकाशमुद्दिश्य) यदि आदेशो दीयते, मन्त्रार्थविषये ममास्ते किञ्चिन्निवेदनीयम्।

यादवप्रकाशः। (स्वगतम्)—विरुद्धभाषितं नैनं बाधते। तथापि किं करणीयम्। (रामानुजमुद्दिश्य) वत्स! तव मतं श्रोतुमिच्छामि।

रामानुजः। देव! निखिलं जगदिदं यदि ब्रह्मस्वरूपमभविष्यत्तर्हि तत्परवर्ति "तज्जलान्" इति पदं नाभविष्यत्।

"सर्वं खल्विदं ब्रह्म"—अस्यार्थः, जगद् ब्रह्मणो जातं ब्रह्मणा जीवति, ब्रह्मणि लीनं च भवति इत्यस्माद् हेतोर्जगद् ब्रह्ममयमिति।

मत्स्यो जलाज्जायते, जलेन जीवति, जले च लीयते इति हेतोर्मत्स्यो जलमय इति वक्तुं पार्यते। तत्र मत्स्यो यथा न जलं, तथा जगदपि न ब्रह्म इति ध्रुवमेव।

यादवप्रकाशः। (सरोषम्) "नेह नानास्ति किञ्चन" इत्यत्र का व्याख्या संगच्छते ?

रामानुजः। "एकाधिकं वस्तु नास्ति" इत्यस्यार्थः कदापि न। अस्य सत्यार्थः—संसारे वस्तूनि सर्वाणि पृथक् पृथगवस्थितानीति। समसूत्र आवद्धो मणिगणो यथा मालाकारेण राजते, तथा ब्रह्मसूत्र-ग्रथितं जगत् सुसमञ्जसं परमशोभनं रमणीयं जातमित्यस्यार्थः। एकसंयुक्तं बहु एकाकारं राजते ; अनेन बहुत्वस्य न काचन हानिरिति।

यादवप्रकाशः। यद्येतादृशो तव विमतिस्तर्ह्यतः प्रभृति न त्वया मत्सकाशेऽध्ययनार्थम् आगन्तव्यम्। (सरोषम्) इयमेव गुरुहन्त्री विद्या ! नैतादृशः शिष्यः कदापि पाठनीयः। (सर्वे निष्क्रान्ताः)

सप्तमोऽङ्कः

[यामुनाचार्यस्य साधनोचितधामगमनम्। महापूर्णेन सह रामानुजस्य श्रीरङ्गम्-पार्श्वस्थिते कावेरीतीरस्थ-श्मशानस्थाने आगमनम्। महर्षे-र्यामुनाचार्यस्य मुष्टिबद्ध-दक्षिणकराङ्गुलित्रयस्य सरलीकरणञ्च]

स्थानम्—कावेरीतीरस्थ-श्मशानम्।

(ततः प्रविशन्ति श्रीलक्ष्मण-महापूर्णौ यामुनाचार्यनश्वरदेहेन सह शिष्याश्च।)

श्रीलक्ष्मणः। अहो नियतेर्निर्ममता !

श्रुत्वा तरुं तरुणकल्पतरुप्रकाशं
यावत् समीपमहमस्य चिरादुपेतः।
व्योम्नः स्फुरद्दिनकरादशनिः पतन्ती
तावत्तरुं तमकरोत् स्मरणावशेषम् ॥६०॥

मम सहाध्यायिन्! यदि ह्येतस्य महापलायनमेवासीदभिलषितं, कथमेष महात्मा मदर्थं भवन्तं प्रैषयत्। अहो! मुहूर्तेन सर्वं

जगज्जातं मसीमलिनम्--सर्वे वयं जाता नष्टाश्रयाः! श्रीरङ्गनाथ! एष एव चेत् तवाभिप्रायः, कथं वा मामत्र सम्प्रैषयः। ब्रूहि, ब्रूहि। (इति उच्चैः रोदिति मूर्च्छति च)

महापूर्णः। (जलं निषिच्य) भ्रातः! समाश्वसिहि, समाश्वसिहि। गुरुदेवस्यासीदत्र महदीप्सितमिति ध्रुवम्। त्वं स्थिरो भव। नैतादृशो महाजनः किमपि कर्म करोत्यकारणम्।

श्रीलक्ष्मणः। (धीरमुत्थाय सुष्ठु निरीक्ष्य च यामुनाचार्यस्य देहम्)।

निष्प्राणादपि निष्पतन्ति नयनद्वन्द्वादमन्दं महो
व्यात्तादोष्ठपुटान्निरेति दशनज्योतिश्च पूतात्मनः।
अङ्गश्चाविकलं विभाति सकलं किन्त्वङ्गुलित्रय्यसौ
किंस्विद् दक्षकरस्य मुष्टिघटिता ? स्यादत्र हेतुर्महान्॥६१॥

(शिष्यगणमुद्दिश्य) अपि मुनिवर्यस्य जीवितकालेऽप्यङ्गुलित्रयं दक्षिणकरस्यासीदेवमेव मुष्टिबद्धम् ?

वररङ्गाख्यः कश्चन शिष्यः। नहि, यदा योगावलम्बनेन देहत्यागे महात्मनानेन कृतः प्रयत्नः, तदाश्रुधारया वक्षोऽस्यासीत् सिक्तम्। ततोऽस्मासु जिज्ञासमानेषु तेन वासनात्रयोल्लेखावसरे मुष्टिबद्धं कृत-मङ्गुलित्रयम्--साम्प्रतमपि तथैव वर्तते।

लक्ष्मणः। अहो लक्ष्मणाभिधोऽस्मि हतभाग्यो न कस्यचन स्नेहममत्वजननकारणं चिराय।

शिष्यः। अपि भवानेव लक्ष्मणो यस्मै श्रीमहापूर्णो भगवतासीत् संप्रेषितः ?

लक्ष्मणः। अथ किम्? अहमेवासौ भाग्यहतः।

शिष्यः। अहो महात्मनः श्रीयामुनाचार्यस्य स्नेहप्रकाशो भवते।

लक्ष्मणः। कथमिव ?

शिष्यः। यतोऽस्य महात्मनः शेषवाक्यं वदनत इत्थं निरगलत् "अहो दौर्भाग्यं जीवनान्तकालेऽपि नासौ वैष्णवसम्प्रदायभाविनेता लक्ष्मणो मे दृष्टिपथमापतितः" इति।

लक्ष्मणः । केन प्रसङ्गेन महात्मा यामुनाचार्य इत्थमभाषत ? अहो भागवती कृपा बलिष्ठा, यतोऽभाजनमपि मामनेन प्रकारेण महात्मायं बहुमानेन योजितवान् ।

वररङ्गः । श्रीलक्ष्मण ! अन्तिमे कालेऽस्य हृदयं वासनात्रयमधिचकार । तस्य गणनावसरेऽङ्गुलित्रयमासीन्मुष्टिबद्धम् । वासनापूर्त्यभावान्नाङ्गुलित्रयं सरलं जातम् इति मन्ये ।

लक्ष्मणः । महात्मनोऽपि वासनाः ? अथवा

अधमो वा महात्मा वा धृतजन्मा धरातले ।
न वासनाविमुक्तः स्याज्जीवन्मुक्तं विना जनः ॥६२॥

किन्तु का नाम ताः ?

वररङ्गः । प्राथम्येन ब्रह्मसूत्राणां वैष्णव-भाष्यविरचनम् ।

द्वितीयतः—अज्ञानहतजनगणमध्ये द्राविडाम्नायप्रचारः ।

तृतीयतः—महामुनि-पराशर-शठकोपनामभ्यामुत्तरसाधकद्वयस्य नामकरणम् । तत्

आजन्मान्तं नितान्तं विषमिव विषयं मुञ्चतोऽप्यस्य साधो-
रेताभिर्मृत्युकाले बलवदधिकृतं मानसं वासनाभिः ।
सम्पूर्तिं कर्तुमर्हः शिशुरपि वयसा विद्यया भूरिवृद्धः
श्रीमानेको विशालेऽखिलधरणितले वासनानाममूषाम् ॥ ६३ ॥

लक्ष्मणः । (उच्चैः क्रन्दनातुरः) अद्याहं केशवकान्तिमतीसुतो महात्म-यामुनाचार्यवरपुष्टः श्रीलक्ष्मणः सर्वजनसमक्षं प्रतिजाने ।

वररङ्गः । (सानन्दम्) ।

प्रतिजान इति प्रोक्तं यदनेन महात्मना ।
तन्नूनं पूर्णतां गच्छेद् गुरोर्नो वासनात्रयम् ॥६४

श्रीलक्ष्मणः । अहं सर्वलोकरक्षार्थं सर्वार्थसंग्रहरूपं सर्वकल्याणकरं तत्त्वज्ञानप्रतिपादकं ब्रह्मसूत्रभाष्यमेकं महात्मनोऽस्य श्रीयामुनाचार्यस्य प्रीत्यर्थं करिष्ये ।

वररङ्गः । अहो ! पश्य पश्य गुरोरङ्गुलिरेका सरलीभूता ।

लक्ष्मणः। अहं सनातन-विष्णुमतमनुसरन् अज्ञानहतं जनगणं पञ्चसंस्कारयुक्तं द्राविड़वेदपरायणं नारायणशरणापन्नञ्च कुर्वन् सर्वदा संरक्षिष्यामि।

वररङ्गः। अहो! स्वत एव महात्मनो द्वितीयाङ्गुलिर्जाता सरला।

लक्ष्मणः। भूयोऽपि उच्चैरुद्घोषयामि महात्मनः पुराणकारस्य पराशरस्य तथा च द्राविडाम्नायकारस्य शठकोपस्य च नामभ्यां भविष्य-साधकद्वयस्य नामकरणम् अहमवश्यं करिष्ये।

वररङ्गः। अहो आश्चर्यं तृतीयाङ्गुलिरपि महात्मनः सरलीभूता।

(सहर्षविषादम्)

गतः परेतो गुरुरद्य शान्तिं
ध्रुवं विचिन्त्यान्तिमवासनान्तम्।
गुरोरकिञ्चित्करशिष्यलक्षाद्
विलक्षणः काममसौ तटस्थः॥६५॥

सर्वे। अहो! एतस्मात् परिज्ञातं किलैष एव महात्मा वैष्णव-समाजस्य नेतृरूपेण राजिष्यत इति।

लक्ष्मणः। (सोरस्ताडम्) अहो! चरमहतभाग्योऽहम् अन्यथै-तादृशमहात्मन आह्वानं संप्राप्यापि कथं नाहं तस्य जीवितसमये तस्योपदेशं प्राप्नुवम्। हन्त भोः!

गुरुं तमालोकितुमासमुत्सुकः स चाधमं मां व्यचिनोच्चिरं गुरुः।
परं परीहासपरेण वेधसा न जीवतोर्नौ रचितं हि मेलनम्॥६६॥

वररङ्गः। भगवता यामुनाचार्येण भवानेवास्माकं नेतृरूपेण स्वीकृतः। सर्वथा स्थैर्यमवलम्बतां भवान्। कृपाभाजनं वयं सर्वे यामुनाचार्यस्य भवामः।

परिहाय शोकजल्पं कल्पस्व तदन्तिमवाञ्छापूर्त्यै।
पूरय निजां प्रतिज्ञां भव च प्रभविष्णुरस्माकम्॥६७॥

(सर्वे निष्क्रान्ताः)

अष्टमोऽङ्कः

[तिरुपतिधाम्नः प्रत्यावृत्तः काञ्चिपूर्णो रामानुजं सन्तोषयति सन्देहदूरीकरणेन ।]

स्थानम्—रामानुजगृहम् ।

प्रविशतो महात्मा काञ्चिपूर्णः श्रीरामानुजश्च

श्रीरामानुजः । अहो महान् आनन्दो मे भवतां पुनर्दर्शनेन । श्रीवरदराजस्य नित्यसहचरो भवान् अस्माकमस्ति चिरपूजनीयः । आत्मानं नीचजातिजन्मानं मन्यमानेन भवताहं स्वीयशिष्यत्वसम्पदो वञ्चितोऽस्मीति मम हृदयं नितरां दूयते । कथमिति चेत् ,

जातिर्न वंशानुगतेति मे मतिः

प्रातिस्विकीं तां गणयामि जन्मिनाम् ।

एवं सति ध्यानतपोजपादिभिः

पूतात्मनः स्याद् गुरुता कुतो न ते ।।६८।।

काञ्चिपूर्णः । वत्स ! त्वया स्वगृहे भोजनाय समाहूतोऽहं स्वयमेकक एवान्नग्रहणं कृत्वा वरदराजसकाशे प्रार्थये—प्रभो ! कोऽयं ते समुदाचारः ? तव तव भक्तगणानाञ्च पादाब्जसेवनेन जीवनं यापयिष्ये इत्यास्ते मे महान् सङ्कल्पः । भवान् पुनर्मम महापुरुषत्व-परिणमनेऽस्ति कृतसङ्कल्प इति प्रत्येमि, अन्यथा कथं श्रीरामानुजावतारो लक्ष्मणो मां साष्टाङ्गं प्रणमति, कथं वाऽसौ मया सह भोजने स्यात् परमसमुत्सुकः ? अमरं पूजयितुकामोऽहं कथं स्यां पूजार्हः ? प्रार्थये तिरुपतिगमनानन्तरं तत्र श्रीबालाजिसंसेवनम् । प्रभो !

लघोर्लघीयाननघेषु वर्त्मसु

स्थितश्चिरं जीवशुभैककर्मसु ।

स्मरंस्तवाहं विभयं पदद्वयं

लभेय शान्तिं चिरनिद्रया कदा ।।६९।।

श्रीरामानुजः। ततो भवतोऽभीष्टसिद्धिः; किन्तु ममान्तरज्वाला-वृद्धिः। भवतां संसर्गायाहमुन्मत्त इव राजे।

काञ्चिपूर्णः। षण्मासान् यावत् प्रतिनिमिषं त्वदर्थं मया श्रीबालाजिसकाशे प्रार्थितं यथा ते चित्तशान्तिर्वरीवर्धेत, यथा च महात्मयामुनाचार्यकृपाभाजनं त्वं वैष्णवजगतो मूर्धनि राजेथा इति।

त्वयि स्थिते मूर्धनि वैष्णवानां भवेत् प्रतिष्ठा महती धरायाम्।
अकर्णधारेव तरीः पयोधौ स्थितिर्विपन्नास्ति यतोऽद्य तेषाम् ॥७०॥

श्रीलक्ष्मणः। मम हृदयेऽधुनाऽपि तीव्राऽतृप्तिर्वसति। सन्देहाश्च केचन मम हृदयं समुद्वेलितं कुर्वन्ति। श्रीवरदराजस्य प्रसादेन तान् सन्देहान् भवानेव समुन्मूलयति चेत् परां शान्तिं लप्स्ये। भवान् मे सहायः।

श्रीकाञ्चिपूर्णः। वत्स! तत् सर्वमहं जाने। स्नेहः प्रेमा च सर्वं करोति गोचरीभूतम्। श्रीवरदराजस्नेहप्रसादादहं तव सन्देहान् दूरी-करोमि। तत्र प्राथम्येन—

वरदराज एव परं ब्रह्म जगत्कारणकारणम्। द्वितीयतो जीवेश्वरयो-र्भेदः स्वतः सिद्ध एव।

श्रीलक्ष्मणः। तथा सति, मोक्षस्य क उपायः?

श्रीकाञ्चिपूर्णः। मुमुक्षूणां भगवत्पादपद्मयोरात्मसमर्पणमेव मुक्ते-रुपायः। भगवद्भक्तानां मोक्षलाभायान्तिमस्मृतिरपि नेष्यते।

श्रीलक्ष्मणः। अपि जीवन्मुक्तिः संभाव्यते?

काञ्चिपूर्णः। नहि नहि वत्स! देहावसान एव भक्ताः परमं पदं लभन्ते।

स्वरूपनिष्ठा मुक्तिरित्यत्र न चेद्विप्रतिपन्नत्वम्।
सा जीवतः कथं स्यात् तदेतदवस्तुक-वाङ्मात्रम् ॥७१॥

श्रीलक्ष्मणः। एतेषां ज्ञानगर्भाणामुपदेशानां प्रदाता भवान् एव मम गुरुः। गुरुरूपेण भवन्तं लब्ध्वा चिरसुखं वाञ्छामीति मम कातराऽन्तिमा च प्रार्थना।

अनुशासनामृतमिदं भवन्मुखात् परिपीय शिष्यपदमेष लब्धवान्।
गुरुकृत्यमेवमखिलं वितन्वतस्तव चार्य किं गुरुपदग्रहेऽरुचिः ॥७२॥

काञ्चिपूर्णः। वत्स ! तव भक्तिं तव श्रद्धां निष्ठां सेवापरायणतां च दृष्ट्वा परं हृष्टोऽस्मि। सत्यमेवास्मि भक्तानां दासानुदासः। नाहं कदापि कस्यचन गुरुर्भवेयम्। श्रीवरदराजप्रसादाज् जानामि श्रीमहापूर्ण एव तवाध्यापयिता गुरुर्भवितेति। तद्वृथा कालो न त्वया यापनीयः। श्रीमहापूर्णमेव गुरुरूपेण वृणीष्व। चित्तशान्तिस्तेऽनिवार्यरूपेण जनिष्यते।

श्रीलक्ष्मणः। एष एव महात्मा महापूर्णः स्वयं यामुनाचार्येण कालकरालग्रसनात् प्राङ् मत्सकाशे संप्रेषित आसीत्। अतस्तेनैव तस्यापि मतं सूचितम्। किन्तु कदा नु तं महात्मानं गुरुरूपेण प्रेक्षे ?

(पादयोः पतित्वा) भगवन् !

वैयाकुलीं कलयता भवता मदीयां
सानुग्रहेण स विधिः परिभावनीयः।
येनायमेत्य न चिराद् गुरुपादपद्म-
मापादयेत् सफलतां चिरसञ्चिताशाम् ॥७३॥

श्रीकाञ्चिपूर्णः। भगवान् वरदराजो वाञ्छति चेदधुनैव तेन सह तव दर्शनं भविता। भगवत्सकाशे प्रार्थनं निवेदय।

श्रीलक्ष्मणः। भगवन् वरदराज !

श्रीकण्ठ-ब्रह्म-विष्णुप्रमुख-मखभुजो ये वरान् दातुमीशा-
स्तेषां राजेति कृत्वा त्वमसि वरदराट् तन्मया याच्यसे त्वम्।
साक्षात्कारं यथाहं झटिति बत महापूर्णदेवस्य लब्ध्वा
पारिव्राज्याय कल्पे परमसुखभृते तत् त्वया साधनीयम् ॥७४॥

श्रीकाञ्चिपूर्णः। श्रीलक्ष्मण ! पश्य पश्य, तव प्रार्थनाबलेन समागच्छत्यत्र न केवलं महापूर्णस्तस्य सहधर्मिणी च। नास्ति कृपाया अन्तो वरदराजस्य।

अत एवान्यान् विहाय सेवस्व वरदराजमनिशम्।
स ते प्रसन्नो दद्यात् कामानिष्टान् साकं मोक्षेण ॥७५॥

[ततः प्रविशति श्रीमहापूर्णः पत्न्या सह]

श्रीमहापूर्णः । (श्रीलक्ष्मणं दृष्ट्वा) एहि एहि वत्स ! देहि मे गाढालिङ्गनम् । मम पूर्णाशिषो लभस्व ।

अहो यस्य दर्शनलाभाय दिवसद्वयं पादव्रजेन चरन् अत्रागतोऽस्मि, तस्य दर्शनलाभेनापगता मे कायिकी मानसी च सर्वव्यथा । एतत् सर्वं श्रीवरदराजस्य कृपयैव संभवति ।

श्रीलक्ष्मणः । कृपान्तर्गूढा भगवतः श्रीवरदराजस्य । अस्मिन्नेव काले भगवतः श्रीचरणयुगलमहमपि प्रार्थितवान् । किन्त्वेतत् पृच्छामि—

मया दीनेन भवतः किं कर्तुं शक्यते प्रभो ।
यत आयासितौ पादौ मत्समीपागमेन ते ।।७६।।

श्रीमहापूर्णः । अहमपि पृच्छामि कथं वा त्वयाहं स्मृत इति ?

श्रीलक्ष्मणः । अहं पुनः

चिरं विचिन्वन् गुरुमात्मवेदिनं श्रीकाञ्चिपूर्णस्य निदेशचालितः ।
अयाचिषि त्वां वरदप्रभुं ततो मां मन्त्रदानेन नयाशु शिष्यताम् ।।७७।।

श्रीकाञ्चिपूर्णः । भवानेवास्य दीक्षागुरुः स्यादेष उद्बोधोऽस्य मया कृतः । त्वदर्थमनेन श्रीवरदराजसकाशे कृतं प्रार्थनञ्च । अहो नु मधुरं यद्भवांस्तस्मिन् एव शुभे क्षणेऽस्मिन् स्थाने समुपागतोऽस्ति ।

श्रीमहापूर्णसहधर्मिणी । अहो ममापि चेतसि जातासीत् प्रातः प्रभृत्यपूर्वानन्दधारा । अहो सर्वं भगवतो वरदराजस्य महामाहात्म्यम् । (काञ्चिपूर्णमुद्दिश्य) आर्य ! न वयं ब्राह्मणाः ? तस्मादस्मै ब्राह्मणाय मन्त्रदानं मम पत्युर्भवेत् समीचीनं वा ? यतः,

न पूर्वैः कृतपूर्वं यन्नावरैः परिचिन्तितम् ।
साधयंस्तादृशं कर्म लोकानां कोपमावहेत् ।।७८।।

श्रीकाञ्चिपूर्णः । एष एव श्रीवरदराजादेश इति महात्मना श्रीमहापूर्णेन चिन्त्यताम् । एष यतिराजो रामानुजसदृशो लक्ष्मणः सर्वेषां परमादरभाजनम् । तस्य भगवदाराधनं सर्वेषां परमहिताय । तस्मादस्याभीष्टसाधनविषये न करणीयः कालविलम्बः । यतः

प्रभुरपि निजशक्त्यैवाप्तुमेष स्वमिष्टं
चिरचरितसरण्या लोपमाशङ्कमानः।
गुरुचरणमुपेतस्तत् त्वमेनं विनीतम्
अनुसृतगुरुकृत्यः शिष्यतां लम्भयेथाः ॥७६॥

महापूर्णः। तत् काञ्चीपुरे गमनानन्तरमेव सर्वं शमकृत्यं सम्पादनीयम्।

श्रीलक्ष्मणः। काञ्चीपुरमस्मात् स्थानाद्दूरवर्ति। हृदयं मे चिरोत्कण्ठं। देव! स्मर्यते, भवता सह समागतोऽपि नाहं श्रीयामुनाचार्य-श्रीचरणकमलयोर्यथाकालमुपस्थितोऽभवं महता प्रयासेनापि। कालो हि बलवान् तद्दूरस्थ-मदूरान्तकनगरे श्रीविष्णुमन्दिर एव गुरुवरणं भवतु।

चेतो ममोत्कलिकया कलितं नितान्तं
कालं कलार्धमपि वाञ्छति नैव सोढुम्।
काञ्चीपुरं तदिदमध्वतु देव दूरं
मां दीक्षयाशु दयया सदनेऽत्र विष्णोः ॥८०॥

महापूर्णः। तद्भवतु श्रीलक्ष्मण! तवैवाभिप्रेतसिद्धिः। परमभक्ति-प्रचोदितं त्वद्वचो मम महते हर्षाय कल्पते। श्रीविष्णोः पुरतः सरोवरतीरवर्तिनि शाखाप्रशाखोपशोभित-कुसुमित-सौरभपुष्ट-वकुलतरुमूले आहवनीयाग्निं प्रज्वलय। चक्र-शङ्ख-चिह्नितायसमुद्राद्वयम् उत्तपनीयम्—यथाक्रमं त्वद्दक्षिण-वामबाहुमूलाङ्कनाय। (अग्निः प्रज्वलति)

[श्रीआलवन्दार-चरणध्यानपूर्वकं महापूर्णेन लक्ष्मणस्य दक्षिणकर्णे वैष्णवमन्त्रस्य कथनम्।]

महापूर्णः। वत्स लक्ष्मण! शृणु माहात्म्यं मन्त्रस्य—

अयं विष्णोर्मन्त्रो वितरति जपाद् भाग्यमतुलं
प्रदत्ते वाग्मित्वं विजयमपि वादे बुधजनैः।
अलं वा व्यासोक्त्या समसनमिदं मे शृणु मुखाच्-
चतुर्वर्गं सोऽयं फलति किल चिन्तामणिरिव ॥८१॥

श्रीलक्ष्मणः। तव शिष्यारूपेणेयमपि मम सहधर्मिणी जमाम्बा ग्रहणीया।

महापूर्णः। (स्वगतम्)

श्रुतमात्रमिदं नाम कर्णपीडां करोति मे।
शुभं स्याद् विष्णुकृपया दीक्षादानमिदं मम ॥८२॥

(प्रकाशम्) तथा भवतु। ग्रहीष्यामि।

श्रीलक्ष्मणः। देव गुरो! अद्य प्रभृति भवान् मम वासस्थानस्यान्तिक एव कुर्यान्निवासं यथाहं नितरां भवत्सकाशे द्राविडाम्नायं निष्प्रत्यूहं पठितुं शक्नुयाम्। यतः,

श्रीयामुनाचार्यमनोऽध्यकार्षीद्
या वासनात्रय्यवसानकाले।
प्राथम्यमेतासु पुनः प्रयाति
श्रीद्राविडाम्नायमतप्रचारः ॥८३॥

स चायमाम्नायवरो द्राविडपूर्वो न मम ज्ञातचरः।
वैदिकमूर्धन्यस्त्वं तत्राधिगतार्थं मां कुरु कृपया ॥८४॥

महापूर्णः। तथाऽस्तु।

[सर्वे निष्क्रान्ताः]

———

नवमोऽङ्कः

स्थानम्—रामानुजस्य गृहम् ।

समयः—प्रातः ।

ततः प्रविशतो रामानुजपत्नी जमाम्बा तस्या गुरुपत्नी महापूर्णसहधर्मिणी च ।

जमाम्बा ।

यावच्छक्ति प्रीतिसंपादकानां
द्रव्यादीनां संग्रहेणोत्तमानाम् ।
आत्मप्रीतिः सर्वथा साधनीया
संसारेऽस्मिन् काम्यमेतन्नराणाम् ॥८५॥

नाहमुत्सहे पत्युर्मेऽतिरिक्त-धर्मकृत्यकरणाय । सर्वेषामासाते गुरुगुं रुपत्नी च; किन्तु कोऽपि न तौ स्वगृहे पोषयति । इष्टदेवतामपि न कोऽपि तादृशं पूजयति यथा मम पतिगुं रुं गुरुपत्नीं च ।

हन्त ! कठोरं खलु मम ललाटलेखनम् । स्वहितविषयेषु न मे पत्युरस्ति लक्ष्यं केवलं परेषां सुखविधानायास्य चित्तमितस्ततो भ्रमति । प्रातः सायं गभीरनिशीथे सर्वदा सर्वानाहूय भोजयति, का वा स्यात्तदर्थं व्रतिनी ? एतदर्थमहं "गृहे किमपि नास्ती"ति मृषा भाषणेनापि समागतानां दूरीकरणं वरं मन्ये । अये इतः पुनरागच्छति गुरुपत्नी । इयञ्च नितरां नीचवंशसम्भूता । मातापितरौ यदि मां कावेरीजले न्यक्षिप्स्याताम् इतो ममाधिकतरं सुखममविष्यत् । अहो मे ललाटलेखा !

स्त्री-पुंसौ परिणीय संसृतिसुखं स्वैरेव पुत्रादिभिः
सेवेते सततं न कोऽपि पथिकान् गेहे स्वके वासयेत् ।
दुर्दैवात् पतिरेष मे परभृता तुल्यः परान् पोषय-
न्नासक्तिं तनुमप्यहो न तनुते दारेष्वगारेषु च ॥८६॥

[ततः प्रविशति महापूर्णपत्नी कलसकक्षा]

गुरुपत्नी । (स्वगतम्)

हंहो गुरोः कर्म गुरुत्वपूर्णं
शिष्यं नयेद्यत् परमं पदं सः ।
काले पुनः शिष्यमतिभ्रमेण
प्राप्तं विलोपं हि गुरोर्गुरुत्वम् ॥८७॥

अये जमाम्बे ! कीदृश्यसि ? कथं वदनं तव मसीपरिवृतम् ?

जामाम्बा । यस्या गृहे ईदृशः स्वामी, तस्या वदनमितोऽपि घोरतर-रूपं स्यात् । किन्तु कुत्र महाभागस्ते ?

गुरुपत्नी । पतिर्मे कार्यव्यपदेशाद्बहिर्गतः ।

जमाम्बा । तस्यापि कार्यं, यस्योदरपूर्तिर्जायते शिष्यगृहे, शिष्य-धनमेव यस्य सर्वस्वम् ?

गुरुपत्नी । जमाम्बे ! मैवं भण, पतिनिन्दनश्रवणेन नरकगामिनी भविष्यामि । कलसपूरणार्थं समागताऽहं तं प्रपूर्यान्तर्यामि । किं मम पत्युर्मत्सनेन ? किञ्च,

अन्नाभावान्न वयं भिक्षव इव त्वदालयमुपागताः ।
अनुनीयैव पतिस्ते सप्रणिपातं नोऽत्र न्यवासयत् ॥८८

(अग्रेसरीभूय कलसं नेपथ्ये स्थापयति, कूपस्य रज्जुं कर्षति च ।)

जमाम्बा । अये मत्स्यजीविकन्यके ! कथं स्वस्पृष्टजलबिन्दुभिर्मम कलसमप्यपवित्रीकरोषि ? अहो ! अहङ्कार एतस्याः । गुरुपत्नीनाम-धारणमात्रेणैव सर्वं कालुष्यमस्या अपगतं किल ? अपि न स्मरसि मम पितृकुलं श्रेष्ठकुलं यथा तव पितृकुलमधमतममिति ? तव स्पृष्टजलं कथमहं पास्यामि ? मूर्खहस्ते विपद्यमानाया मम सर्वमपगतं कुलं शीलञ्च । गुरुपत्नी सर्वदा मूर्धनि स्थापनीयेति कीदृशो वा शास्त्रविधिः ? नाहमेतादृशं मूर्खभाषितं समाद्रिये ।

शास्त्रेषु दृष्टो यदि जातिभेदो
मान्यो न वर्णाश्रमिभिः कथं सः ।

अथैवमर्च्या गुरुवद् द्विजानां
कथं गुरोः पत्न्यपि नीचजातिः ॥८६॥

(इति रोषेण कम्पते)

गुरुपत्नी। जाने तव कुलगौरवम् अस्मत्तः समधिकमिति। यथा प्रत्यागमनानन्तरमेव पतिर्मे एतदालयं परित्यज्य स्थानान्तरं यायात्, तन्निश्चितं विधास्ये।

(स्वगतम्) भगवन्! अशेषक्षमासहिष्णुतास्नेहममत्वप्रवणस्य पत्युम इयं दशा! कीदृशं तव विधानम्? पत्नीसविधे पत्युरपमानमिदं मम ललाटे त्वया लिखितम्? (इति रोदिति)

जमाम्बा। अयि अकारण-रोदनपटुके कुम्भीराश्रुभारमालिनि! स्वस्थानं प्राथम्येनाधिकुरुष्व। तदनन्तरं चक्षुर्जलं विसृज्य भगवन्त स्मर।

सर्वं पापमेतत् पत्युर्ममाकालाकारणसन्न्यासभाणकृता सृष्टिः। निश्चितं दूरं गच्छ त्वं गच्छतु तव स्वामी च। यथा तथा गच्छ, का मे हानिः?

गुरुपत्नी। (रुदती स्वगतम्) भगवन्! मम पत्युर्यथा किमप्यकल्याणं न भवेत्तद्विधेहि।

[इति बहिर्गच्छति]

जमाम्बा।

अहो महान् मे मनसः प्रसादो
मयि प्रसादाभिमुखश्च धाता।
चिराय चित्ते मम कीलितो यो
बहिष्कृतः सोऽद्य गुरुः सदारः ॥९०॥

भवतु, किन्तु किं पत्ये निवेदनीयम्? अथवा पतिसुखहीनाया नार्या मृषाभाषणमेव बलम्। अहो! किमप्यन्विष्यन्नित एवायाति गृहपतिः।

[प्रविशति लक्ष्मणः]

श्रीलक्ष्मणः। (ससन्तोषं पत्नीमुद्दिश्य)—

समाप्तपाठ"स्तिरुवाइमुडी"ति
ग्रन्थो मया यत् तदहं विधास्ये।
भार्यासमेतस्य गुरोः सपर्याम्
आर्येषु शिष्यव्यवहार एषः ॥६१॥

तदर्थमापणादानीतं मया सर्वं वस्तुजातं फलं ताम्बूलं पुष्पं नववस्त्रमेवमन्यत्।

[गुरुमुद्दिश्य स्तोत्रं पठति, हर्षप्रकर्षं च विज्ञापयति]

अहो भगवतो गुरोश्च मध्ये को नाम भेदः? समवस्तुन एव पृष्ठद्वयवदेकः प्रत्यक्षोऽन्यश्चाप्रत्यक्षो वर्तते। वस्तुतस्तौ द्वौ समावेव।

चूतमुकुलगन्धेन यथा वसन्तो ज्ञायते, कुङ्कुमपरागविस्तारेण यथा काश्मीरदेशः शिखाप्रसारेण यथा वह्निस्तद्वद् गुरोः कृपावर्षेण भगवान् प्रायेण प्रत्यक्षीक्रियते।

जमाम्बा। अये! न त्वादृशमन्यं कमपि गुरुभक्तमश्चलेऽस्मिन् पश्यामि। ग्रन्थसमाप्तिः प्रचुरव्ययमपेक्षते इति त्वत्तोऽहं सद्यो जानामि। मम पिता धुरन्धर-महापण्डितः; किन्तु प्रतिक्षणमर्थापव्ययं न करोति।

श्रीलक्ष्मणः। (स्वगतम्) भगवन्! कीदृशं मम भाग्यम्? पत्नी किल पतिजीवनस्य श्रेष्ठा सम्पत्। किन्त्वविद्यारूपिणी भोगसर्वस्वा नारी सर्वानर्थस्य मूलकारणम्। भवतु, एषा सर्वथा मया परित्यक्तव्या। किन्त्वद्यतन-गुरुपूजनं सुसम्पादनीयमेव। (जमाम्बामुद्दिश्य) भद्रे! कथं विस्मरसि यद् गुरुरेव कृपया त्वां शङ्खचक्रचिह्नाभ्यां समलंकृतवान् येन त्वं धर्मपथे परिचालिताऽसीति।

जमाम्बा। नहि नहि, अहं तु मन्ये नीचजातिसंस्पर्शादुच्चकुलसम्भूताऽहं पापसंस्पृष्टेति।

श्रीलक्ष्मणः। अपि सत्यमियमेव तवानुभूतिः ? सा गुरुदेवेन गुरुपत्न्या चावश्यं ज्ञातव्या। (गुरुदेवमुद्दिश्य) देव ! भवानन्तस्तिष्ठति चेदत्रागच्छतु। गुरुदेव गुरुदेव ! मातृदेवि मातृदेवि ! (इत्युच्चै-राक्रन्दति। प्रागेसरीभूय) किन्तु कोऽपि नागच्छतीति कथम् ?

पुरैवं प्रार्थ्यमानौ तावथातामविलम्बितम्।
अद्य रोरुद्यमानस्याप्यायातस्तौ कथं न मे ॥६२॥

(अदूरत आयाति कश्चन प्रतिवेशी)

प्रतिवेशी। (प्रविश्य) श्रीलक्ष्मण ! क्षणात् पूर्वं तव गुरुपत्नीं प्ररुदतीं बहिर्गमनशीलामपश्यम्। तव भार्या किमपि जानीयात्।

जमाम्बा। (स्वगतम्) अहो ! निश्चितं श्रुतवानेष वृत्तजातं सर्वम्। (प्रकाशं) निश्चितं जानामि। यतः स्वोत्तोलितकलस-जलकणाभिर्मम जलपात्रं कालुष्यं सा नीतवती; ततोऽहं तां गुरुपत्नीं विशेषेण तिरस्कृतवती।

मत्स्यजीविकुलोत्पन्ना स्वस्पृष्टजलबिन्दुभिः।
अदूषयद् घटं यन्मे तन्मया सा तिरस्कृता ॥६३॥

प्रतिवेशी। श्रीलक्ष्मण ! यदि जगतो हितं वाञ्छसि, स्वगुरु-दम्पती भार्यामिमां वा दूरे स्थापय। भार्यया स्वगुरुदम्पत्यपमानविवर्धनं न केवलं स्वस्य, परन्तु सर्वस्यैव देशस्य विनाशायैव।

द्वारं हि दीक्षा द्यु-निकेतनस्य
सौभाग्य-सौधस्य च निस्तुलस्य।
एकस्तदादेशक एष देवो
ध्येयो विधातेव गुरुर्नरेण ॥६४॥

अपिच,

यस्तं नृदेहे परमेश्वरं गुरुं
सम्भावयेन्नैव सपर्यया कुधीः।
लोकान्तरं भ्रश्यति नास्य केवलं
सांसारिकी शान्तिरपि प्रणश्यति ॥६५॥

श्रीलक्ष्मणः। अहो धिङ्मामधन्यं गुरोरपमानहेतुभूतम्। विभो जगत्पते! सन्न्यासधर्मं कुरु मम संबलम्। संसारदावानलजर्जरितस्य मम सन्न्यासो भवतु चिरशान्तिः।

(आकाशभाषितम्—भगवत्या लक्ष्मीदेव्याः)

सुख-चिरनिःस्वे कलुषितविश्वे
त्वमय परिव्राट्पदमतिपूज्यम्।
भव च ममाशीर्वचनमहिम्ना
विमलयतीन्द्रः सुत! यतिमान्यः ॥६६॥

श्रीलक्ष्मणः। (आकर्ण्य) मातः! प्रतिजाने त्वत्प्रदत्तविमल-यतीन्द्र-पदवीधारणसमर्थत्वं येन केनापि प्रकारेणाजयिष्यामि।

(सर्वे निष्क्रान्ताः)

———

दशमोऽङ्कः

(प्रथमदृश्यम्)

[भूतपूर्वगुरु-यादवप्रकाशस्य लक्ष्मणसकाशाद् वैष्णवधर्मग्रहणम्।]

प्रविशति यादवप्रकाशः। अन्यतश्च कुरेश-
समाह्वय-शिष्य-समन्वितो लक्ष्मणः।

यादवप्रकाशः। (स्वगतम्) लब्धो मातुरादेशः; तथा काञ्चि-पूर्णमाध्यमेन भगवतो वरदराजस्य च। हन्त! लक्ष्मणोऽयं मम गुरुर्भविष्यति। अहो भवितव्यता!

शिष्यत्वमापादयमेनमेकदा
दोषैर्लघावप्यतुदञ्च यद् भृशम्।
तन्निष्क्रयः सम्प्रति तेन साध्यते
भुङ्क्ते फलं नः स्वकृतेरिहैव किम्? ॥६७॥

तद्यथा तथा भवतु। स्थानमिदं परमरमणीयं मम प्रतिभाति।

रामानुजः। (यादवप्रकाशं दृष्ट्वा) अहो सुप्रभातम्, सुप्रभातम्!

दिष्ट्या भवन्तं प्रेक्षे। कदा न्वागतमत्र, अपि भवतः कुशलम् ? स्मरामि देव! तदानीन्तनगुरुगेहवाससुखम्—

यथाक्रमं साधित-पाक-कर्मभिर्यथाविधानं गृहकर्मकारिभिः।
निशान्त-यामेऽध्ययनप्रमोदिभिरयापि कालः सुखमस्मदादिभिः ॥६७॥
गतेऽर्धयामेऽध्ययनान्निवर्तिभिः क्रमेण सम्पादितशौचकर्मभिः।
उपास्य सन्ध्यामवगाहपूर्वकं न्ययोजि भूयोऽध्ययने निजं मनः ॥६८॥

यादवप्रकाशः। सर्वं शुभं परमकल्याणमयम्। देशे देशे उड्डीयते तव विजयवैजयन्ती नदति च तव विजयढक्का। तत्त्वां द्रष्टुमत्रागतोऽस्मि।

रामानुजः। सा नु भवतो महती कृपा। अपि किमप्यहं भवदर्थं कर्तुं पारयामि।

यादवप्रकाशः। सन्देहाकुलं मम मनः। कतिपयान् प्रश्नान् समुत्थापयामि तेषां समाधानाकाङ्क्षया।

रामानुजः। यदि प्रश्नोत्तरं ममायत्तीभूतं भवेत्तदवश्यमेव भवत्-सन्देहदूरीकरणे समुद्युक्तो भविष्यामि।

यादवप्रकाशः। इतः पूर्वमपि लक्ष्मण! त्वं ब्रह्म सगुणं सविशेषं वा तर्कप्रसङ्गेन कथितवान्। भूयोऽपि पृच्छामि काऽत्र तव श्रेष्ठयुक्तिः ?

रामानुजः। देव! श्रूयतां मम सविनयभाषितम्। विचित्रतामयं विश्वमिदं जीवजगच्च—ब्रह्म च वैचित्र्यहीनमेकरसम्। निर्विशेषाद-द्वितीयात् कथं वैचित्र्यपूर्णं जगज्जायेत ? द्वैतहीनवस्तुनो द्वैतसमुत्-पत्तिर्न सम्भवति। अतो दृश्यमानजीवजगतोमूलेऽदृश्यातिसूक्ष्मजीव-जगद्विशिष्टस्वरूपं कारणं विद्यते इति ध्रुवमेव।

यादवप्रकाशः। समीचीना तवोदाहृतिः। अन्यश्च प्रश्नः। मुक्त-जीवस्यावस्था कीदृशी ?

रामानुजः। मुक्तिफलेन जीवो ब्रह्मणि न निलीयते। जीवो भगवतो नित्यदासः। निरवच्छिन्न-भगवद्दास्यलाभ एव मुक्तिः।

यादवप्रकाशः। अपि दासस्यात्यन्तिकदुःखनिवृत्तिः कदापि संभवति ? अपि दासस्य दुःखं निर्मूलं भवेत् ?

रामानुजः। भगवद्दास्यं सर्वथा दुःखविरहितम्। आनन्दस्योत्तरोत्तरवृद्धिरेवात्रत्या रीतिः। यतो जीवः स्वरूपतो भगवद्दासस्ततो भगवन्तं सेवमानो जीवः स्वस्वरूपस्थितः कथं दुःखं भजेत ?

यादवप्रकाशः। भूयः पृच्छामि—सगुणोपासना तुभ्यं रोचते ? ऊर्ध्वपुण्ड्रं बाहुद्वये पद्मं चक्रञ्च धारयसि। किन्तु तत्र शाब्दप्रमाणं किम् ? शब्दप्रमाणा विशेषेण भारतीयाः। तद्विशेषेण श्रोतुमिच्छामि।

रामानुजः। एष मम शिष्यः कुरेशः सातिशयमेधावी शास्त्रप्रमाणेन भवन्तं सन्तोषयिष्यति। (कुरेशमुद्दिश्य) कुरेश ! अस्मत्पूर्वगुरोः पण्डितवर्यस्य प्रश्नोत्तरं देहि।

कुरेशः। गुरोरादेशाद्यथाशक्ति यतिष्ये।

महाभाग ! वेदेषु सामवेदः श्रेष्ठ इति भगवान् स्वयं प्राह। ततः सामवेदप्रमाणं प्राथम्येन दीयते

प्र ते विष्णोरब्ज-चक्रे पवित्रे
जन्माम्भोधिं तर्तवे चर्षणीन्द्राः।
मूले बाह्वोर्दधतेऽन्ये
पुराणलिङ्गान्यङ्के तारकाण्यर्पयन्ति॥

अर्थात् नरश्रेष्ठा भवसागरोत्तरणमानसा बाहुमूले श्रीविष्णुचिह्नं पवित्रं पद्मं चक्रञ्च धारयन्ति। पुनः केऽपि पुराणचिह्नानि चेति। पुनराथर्वणे—पवित्रमित्यग्निः। अग्निर्वै सहस्रारः। सहस्रारो नेमिः। नेमिना तप्ततनुर्ब्रह्मणः सायुज्यं सलोकतामाप्नोति। अर्थात् चक्रचिह्नयुक्तो जनः ब्रह्मलोकवासाधिकारीति निश्चितमेव।

यादवप्रकाशः। (स्वगतम्)

उद्धृत्यासौ धीमतां रत्नभूतो
वेदाम्भोधेश्चक्रपद्मप्रमाणम्।
विस्मेरं हा नाकरोत् केवलं माम्
आचार्यं स्वञ्चातनोत् कीर्तिमन्तम्॥६१

अहो शिष्यस्याप्येतादृशं पाण्डित्यं का कथा तदा नु गुरुवर्यस्य। धन्योऽयं गुरुर्यस्यतादृशः शिष्यः। अथवा युगसमुद्धारकारी भगवान् सर्वदा सपार्षदमवतारांशमपि प्रेषयति खलु। (प्रकाशम्) ततस्ततः।

कुरेशः। विष्णुचिह्नविषये पराशरसंहितायां दृश्यते—

एभिर्वयमुरुक्रमस्य चिह्नै
रङ्किता लोके सुभगा भवामः।
तद्विष्णोः परमं पदं
ये गच्छन्ति लाञ्छिताः॥

महाभारतस्य भीष्मपर्वणि विशेषेणोक्तमास्ते—वैष्णवैरवश्यमेव शङ्ख-चक्रादयो धारणीयाः। यथा

"उपवीतादिवद् धार्याः शङ्खचक्रादयस्तथा।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः॥"

यादवप्रकाशः। तत् स्वीकृतम्। किन्तूर्ध्वपुण्ड्रधारणे किं प्रमाणम्?

कुरेशः। महोपनिषत्तत्र प्रमाणम्। "हरेः पदाकृतिमात्मनो हिताय मध्येच्छिद्रमूर्ध्वपुण्ड्रं यो धारयति स परस्य प्रियो भवति; स पुण्यवान् भवति, स मुक्तिमान् भवति।"

श्रीलक्ष्मणः। साधु कुरेश साधु। यथासमयं तव यथायथ-भणितिर्मां भृशं प्रीणयति।

पारम्पर्यवशादसेवि वपुषि प्रागूर्ध्व-पुण्ड्रादि यत्
तत्रालक्ष्यमुदाहृतं सुविशदं वेदप्रमाणं त्वया।
यत्रास्मद्गुरवो न कश्चन समाहर्तुं प्रमादं क्षमा
अन्तर्निःसृतसाधुवाद-विकशन्नेत्राननाः संस्थिताः॥१००॥

यादवप्रकाशः। लक्ष्मण! कथञ्चिदाश्वस्तस्यापि मम सन्देहो न संपूर्णतया निवृत्तः। शङ्खचक्रोर्ध्वपुण्ड्र-धारणे शास्त्रप्रमाणं तव शिष्येण प्रदर्शितम्। किन्तु ब्रह्म सगुणमिति विषये किं श्रुति-प्रमाणम्।

लक्ष्मणः। कुरेश! प्रमाणमुपस्थापय।

कुरेशः। देव! बाढम्। श्वेताश्वतरोपनिषदि सगुणं ब्रह्म विज्ञियते—

"यः सर्वज्ञः सर्ववित्।
पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥"

पुनः "अपहतपाप्मा विजरो विमृत्युर्विशोको
विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः ॥"

एतेभ्योऽस्य ब्रह्मणः सगुणत्वं सर्वथा विज्ञायते।

यादवप्रकाशः। भ्रातः कुरेश! विरम विरम। तव शास्त्रप्रमाण-बलेनाहं पूर्णतया विजितोऽस्मि। अहो धन्यस्त्वमसि यस्यैतादृशो गुरुः। एनं महात्मानं श्रीलक्ष्मणं रामस्य सत्यानुजं गुरुरूपेण वरयन्नहमपि धन्यो भविष्यामि। (रामानुजमुद्दिश्य) वत्स रामानुज! मामपि तवान्तेवासिनं कुरु। ज्ञानदीपोऽद्यैव लब्धो मया। मामुद्धर। अयि वत्स!

अभिमानं वहन् भूरि वेदान्ताचार्य इत्यहम्।
त्वयि रूक्षो यदभवं तन्मे त्वं क्षन्तुमर्हसि ॥१०१॥

अपि च,

सोढुं त्वदीयां प्रतिमामशक्नुवन्
पूर्वं वधायासमहं तवोद्यतः।
तत्त्वं क्षमासारतया क्षमस्व मे
दौर्जन्यमाचार्यविरुद्धमुद्भटम् ॥१०२॥

श्रीरामानुजः। भूतपूर्वगुरोर्भवत इयमुक्तिर्मां व्रीडयति। भगवान् भवतः सहायो भवतु। गाढालिङ्गनबद्धस्य भवतः शान्तिः प्रकामं पुनरायातु। (भूमेरुत्थापयन् यादवप्रकाशम् आलिङ्गति।)

यादवप्रकाशः। अहमपि पञ्चसंस्कारान्वितो भविष्यामि।

रामानुजः। तथाऽस्तु। अद्य प्रभृति भवान् गोविन्ददास इति नवीननाम्ना परिचितो भविष्यति। किञ्च, यतो वैष्णवान् प्रति भवतामासीद्रोषो महान् तत् सवप्रत्यवायखण्डनाय "यतिधर्मसमुच्चय", नामको ग्रन्थो विरच्यताम्।

यादवप्रकाशः। स्वल्पैर्दिवसैरेव तत् सुचारु करिष्यामि।

रामानुजः। कुरेश! एवं सद्धर्मो जगति विजयताम्।

कुरेशः। सद्धर्मो जगति विजयताम्।

(निष्क्रान्ताः)

द्वितीयदृश्यम्

[यज्ञमूर्ति-विजयः]

ततः प्रविशतो यज्ञमूर्ती रामानुजश्च।

यज्ञमूर्तिः। (स्वगतम्) अहो अष्टादशदिवसोऽयं वाग्युद्धनिरतयोरावयोः।

जयः पराजयो वापि कस्यापि न हि दृश्यते।
मनो मे वक्ति वादेऽस्मिन् ममैव स्यात् पराजयः ॥१०३॥

यतः। यैर्यैर्विवादो व्यजनिष्ट विज्ञैः संसत्सु पूर्वं मम तासु तासु।
एकेन वाह्ना द्वितयेन वा ते प्रायः परास्ता मम तर्कजालैः ॥१०४

अद्य पुनः प्रातः प्रभृति मम मनसि जायते—वादविवादाभ्यां किम्? इति। (रामानुजमुद्दिश्य) महाभाग! भवतो वदनारविन्दे दृश्यतेऽद्य काचनापूर्वा हर्षरेखा सर्वथाऽतुलनीया। अपीयं भागवती दुर्घतिः? अपि भवतो भगवान् स्नेहातुरः करस्पर्शेन भवत आनन्दाधिक्यं जनितवान्?

रामानुजः। सम्यगुपलक्षितं भवता, परमदयालुर्मे भगवान् वरदराजः सर्वदा सुप्रसन्नो मह्यं मङ्गलकरं संप्रसारयति। तेन संप्रसारितो मङ्गलकरो मम सर्वं दुःखमपहृतवान् इति कुतः सन्देहः।

सन्देहवात्याक्षुब्धचित्तोऽसावेव नित्यस्थिरशान्तिः दावानलदग्ध-मनस्यसावेव नित्यसुखोत्सः। अशान्तेर्दुःखस्य वा का कथा।

यज्ञमूर्तिः। (श्रीरामानुजस्य पादयुगलं गृहीत्वा) देव! तव माहात्म्यप्रभावादवसितं मम कूटतर्कमयजीवनम्। नाहं परमभक्तिमूर्तिना त्वया सहातस्तर्कजालविस्तारे समुत्सहे। तव शिष्योऽहं दासोऽहम्। पवित्रोपदेशालोकसञ्चालनेन तमोवृतं मे मनः कुरु दिव्यालोकोद्भासितम्। वृथापाण्डित्याभिमानसमाश्रयेण जीवनं ममाधन्यं कृतम्। महता कृपाबलेन तदिदं कुरु सार्थकम्।

रामानुजः। यज्ञमूर्ते! भगवतो वरदराजस्य कृपेयं यत् त्वमद्य कूटतर्कप्रपञ्चेन नात्मानं विडम्बयसि। अहो कठोरः खलु पाण्डित्याभिमानः। विद्या ददाति विनयमिति सत्यम्। किन्तु सा विद्या यदाऽविद्यामूर्तिर्भूत्वा भवति विशेषेण दम्भमदप्रसूतिस्तदा विनयः सर्वथा दूरं याति। भगवत्कृपया खलु त्वं दम्भच्युतोऽसि।

यज्ञमूर्तिः। एतद् भवतः कृपाफलम्। अधुना शरणागतस्य मम किं करणीयं तद्विषयकमुपदेशं प्रार्थये।

रामानुजः। वत्स! तव प्रथमं कार्यं यज्ञोपवीतधारणम्। तथा हि—

"हीनो यज्ञोपवीतेन यदि स्याज् ज्ञानभिक्षुकः।
तस्य क्रिया निष्फलाः स्युः प्रायश्चित्तं विधीयते॥"

यज्ञमूर्तिः। गुरोरादेशोऽधुनैव पालनीयः।

रामानुजः। तव भक्तिमाधुर्येण भृशं प्रीतोऽस्मि। कुरु त्वं यज्ञोपवीतधारणं, तथोर्ध्वपुण्ड्रादिधारणञ्च। किञ्च

कृपया देवराजस्य यदसि प्राप्तचेतनः।
तदद्यप्रभृति ख्यातो देवराजाख्यया भव॥१०५॥

(निष्क्रान्तौ)

एकादशोऽङ्कः

[गौष्ठीपूर्ण-रामानुजसंवादः]

ततः प्रविशति रामानुजः ।

रामानुजः । अहो ! निश्चितं मालिन्यपूर्णोऽस्मि । यत एष देशिकेन्द्रो गोष्ठीपूर्णोऽष्टादशवारं मां प्रत्याख्यातवान् । धिङ्मामधन्यम्, किं वाधमजीवनेन मम ? किं मूल्यं तस्या भूमेर्यत्र नास्त्युर्वरता, किं वा तेनोत्सेन यत्र नास्ति जलप्रवाहः ; किं तेन गन्धराजेन यस्य नास्ति गन्धलेशोऽपि, किं भ्रमरेण यस्य नास्ति गुञ्जनम्, किं जीवनेन तस्य साधोर्येन नार्जितोऽन्यसाधुविश्वासः ? अत एव ममायं सङ्कल्पः—

जानात्ययं भगवतः सरहस्य-मन्त्रं
नारायणस्य नरलोकसुदुर्लभं यत् ।
ग्राह्यो मया तदयमस्य गुरोः सकाशात्
स्याद् येन मुक्तिपदवी न दवीयसी मे ॥१०६॥

भवतु, शेषप्रयासमद्य यत्नतः करिष्ये । पराजये सति नाहमित ऊर्ध्वं जीवितं धारयिष्ये । अये ! अदूरे दृश्यते किल साधुश्रेष्ठो गोष्ठीपूर्णः । भूयोऽपि तस्मै स्वप्रार्थनं निवेदयिष्यामि । [धावन् कियद्दूरं गत्वा] भो भो महाभाग ! प्रणामाञ्जलिं गृह्णीष्व ।

[ततः प्रविशति गोष्ठीपूर्णः]

गोष्ठीपूर्णः । (स्वगतम्) अहो ! एकनिष्ठता रामानुजस्य !

भूयो भूयः करुणकरुणं शिष्यतां याचते मे
प्रत्याख्यातो रचयति पुनश्चाञ्जलिं पादनम्रः ।
कुर्वन्नष्टादशदिनमयं साधनामेवमुग्रां
सिद्धिं कस्मादिह न लभतां मत्सकाशात्तपस्वी ॥१०७॥
तदस्याभीष्टदानेन तोषयिष्येऽद्य मानसम् ।
भवेन्नैतादृशो यत्नो वैफल्यमलिनः क्वचित् ॥१०८॥

[प्रणतं रामानुजमुद्दिश्य] रामानुज ! तव भक्तिप्रकर्षेणाहं परं तुष्टोऽस्मि । त्वत्सदृशाधारो विरल एव । वाञ्छसि त्वं सरहस्यमन्त्र-राजम् । तं तुभ्यमहं दास्ये । विष्णुं विना नान्यः कोऽपि माहात्म्यमस्य जानाति । यः कोऽपि मन्त्रमेनं श्रोष्यति, देहान्ते मुक्तिं प्राप्य वैकुण्ठ-धामभाग् भविष्यति । अतो नैष मन्त्रोऽन्यस्मै कस्मायपि दातव्यः । [कर्णे मन्त्रं ददाति ।]

रामानुजः । गुरो ! भवत्पादपद्मं मम शरणम् । लब्धं मया दिव्यं ज्ञानम् । धन्यश्च मम जीवनम् । गुरुदेवचरणपङ्कजेऽधमशिष्यस्य कोटि-कोटि-प्रणामाः ।

अद्य मे फलितं देव त्वदाराधनशाखिना ।
प्रयासः सार्थकीभूतो मम श्रममपाहरत् ॥१०९॥

गोष्ठीपूर्णः । स्वस्त्यस्तु ते वत्स ! तव कल्याणमहं भूयो भूय आशंसे । [गोष्ठीपूर्णो बहिर्गतः ।]

रामानुजः । (विचिन्त्य) हन्त ! किमेष मन्त्रराजो जगति चिरमवि-दितस्तिष्ठतु ? न हि नहि निश्चितमेवाहं सर्वजनमुक्तये मन्त्रमेतं सर्वान् श्रावयिष्यामि ।

वरमस्तु तमोगहनो निरयो गुरवोऽभिशपन्तु वरञ्च रुषा ।
न तथापि नृणां तरणीकतरीं बत गोपयितास्मि नृशंस इव ॥११०

(चतुर्दिशं विलोक्य) भ्रातरो भगिन्यश्च ! सर्वे यूयं मत्सकाश-मागच्छत, तूर्णमागच्छत । युष्मभ्यमद्य दास्याम्यहमनर्घ्यं रत्नम् । तद् गृह्णीत । उच्चैर्वदत "ॐ नमो नारायणाय" । (कतिपये जनाः प्रविशन्ति)

समवेताः सर्वे जनाः । "ॐ नमो नारायणाय" अहो मन्त्रस्यापूर्वः प्रभावः । अन्तरात्मा सर्वेषामस्माकं सुशीतलो जातो निमेषादेव ।

अहो ! इतः साधुश्रेष्ठो गोष्ठीपूर्णो आयाति ।

(पुनः प्रविशति गोष्ठीपूर्णः)

गोष्ठीपूर्णः । (लक्ष्मणमुद्दिश्य सरोषम्) दूरं गच्छ, नराधम । त्वादृश-नरपशवे महारत्नं प्रदायाहं भृशं दुःखितोऽस्मि । मया सर्वथा निवारित

आसीगुर्ह्यस्यास्य मन्त्रस्य प्रकटीकरणात्। निमेषमात्रः समयोऽपि न त्वया व्ययितः। झटिति रहस्यमन्त्रः सुप्रकटीकृतः? न तव स्थानं नरकेऽपि भविष्यति।

दूरे प्रतिश्रुतमस्तु लघ्वपि वचनं पामरायोक्तमपि।
न हि वितथीभवति सतां का वा कथा गुरवे प्रतिश्रुतस्य ॥१११
तत्र त्वयाऽद्यैव कृता प्रतिज्ञा गुरोः समीपे यदकालहीनम्।
आनायि वैयर्थ्यमतो दुरात्मनो लोकद्वयं ते नचिराद् विनश्येत् ॥११२

रामानुजः। (भयलेशहीनः सविनयम्) महात्मन्! नरकवासाय दृढसङ्कल्पोऽहं भवदादेशमुल्लङ्घितवान्। यदि सत्यमेवैतन्मन्त्रराज-श्रवणेनैव मानवो मुक्तिं लभेत, तद्बहूनां मोक्षपथमहं निरर्गलीकृतवान् इति धन्योऽस्मि। देहान्ते सर्वे ते परमपदभाजः सुखं स्थास्यन्ति। यदि मादृशाधमजनस्याकिञ्चित्करेण कायक्लेशेन बहवो जनाः परमपदं लभन्ते, तदा मम नरकगमनं शतवारमाकाङ्क्षितम्। भवदादेशलङ्घनाद्भवतु मम नारकजीवनम्, किन्तु पापितापिनां भवतु परमा गतिः। नास्ति किञ्चनेतो मम श्रेयस्करम्।

गोष्ठीपूर्णः। [निपुणं रामानुजं विलोक्य स्वगतम्]-अहो परमौ-दार्यमस्य महात्मनः—य आत्महितं तृणवत्तुच्छीकरोति।

[प्रथममालिङ्ग्य पश्चात् करपुटं बद्ध्वा]

भो महानुभाव! अद्य प्रभृति त्वमसि मम गुरुः, अहञ्च तव शिष्योऽस्मि। यस्य हृदयम् ईदृशीं विशालतां भजते, ध्रुवमसौ श्रीविष्णो-रंशावतार एव। नात्र कश्चन सन्देहः। अधमाधमजीवोऽहं कथं तव महामाहात्म्यं जानीयाम्?

यच्छिष्यतां भवान्नीतो मूढेनाजानता मया।
क्षमा मया याचितास्तु पापे तत्राघमर्षणी ॥ ११३ ॥

रामानुजः। (लज्जावनतमस्तको गुरुचरणद्वन्द्वं विधृत्य) महात्मन्! भवानस्ति मम नित्यगुरुः। भवन्मुखपद्मनिःसृतो मन्त्रः स्वतः एव बलीयान्; तत्रैव तस्य माहात्म्यम्। भवतोऽसीमः प्रभावः कणाकारेण

संक्रामितो मन्त्रमेनमेतादृशशक्तिकमकरोत्, यद्बलेनाद्य बहूनां जनानां मुक्तिः संघटिता, दुःखसन्तापराशिर्लोपं गतः, किञ्च, महापातककारी अधमाधमोऽहं भवादृशस्य महात्मन आलिङ्गनभाजनमभवम्। सन्तान-रूपेण दासरूपेण वा सर्वदा स्वचरणे स्थानमस्मै दास्यसीति ममेय-मैकान्तिकी प्रार्थना।

गोष्ठीपूर्णः। भो लक्ष्मण! त्वं सत्यमसि रामानुज-लक्ष्मणसदृशः कलियुगीय-रामानुजः। अतः प्रभृति त्वं रामानुजनाम्ना प्रख्यातो भविष्यसि।

किञ्च, आत्मानं मत्पुत्ररूपेण स्वीकृतवतस्तव मत्पुत्रः सौम्यनारायणो भवतु शिष्यः। अक्षयो भवत्वस्माकं सम्पर्को वंशपरम्परया। सर्वे वदत—जय रामानुज जय।

सर्वे। जय रामानुज जय। (निष्क्रान्ताः सर्वे)

द्वादशोऽङ्कः

प्रथमदृश्यम्

[श्रीभाष्यरचन-वृत्तान्तः]

कुरनाथो रामानुजश्च प्रविशतः

रामानुजः। कुरनाथ! प्रेष्ठोऽसि त्वं मम शिष्यो वा सन्तानो वा। अहो महती कृपा मातुः सरस्वत्या या स्वयं मह्यं बोधायनवृत्तिं दत्तवती। अस्या वृत्तेः साहायकं विना भाष्यविरचनं सर्वथाऽसंभावितम्।

कुरनाथः। अस्माकं सर्वः श्रमः सार्थक एव। किन्तु क्रूराः खलु ते पण्डिता ये स्वग्रन्थागारसंरक्षितं ग्रन्थं बहुदूरसमागताय बुधायापि न ददति। क्षुद्रचेतस्काः खलु ते।

रामानुजः। कुरेश! एवं हि जगत्। कथं सर्वमेव जगत् सर्वथाऽस्माकमनुकूलं स्यात्। तथापि पश्य, मातुः सारदाम्बिकायाः कृपया किं न संघटितम्? परजनन्याश्चरणसरोजमेवास्माकं केवल-शरणम्। मानवानां व्यवहारस्तु बाह्यजगद्विषयकः तेन भवत्वस्माकं सुखं वा दुःखं वा तत् सर्वथा सामयिकमेव। जननीदत्ताशीर्वाद एव शाश्वतिकः। अहो केषाञ्चन वाक्यालापमिव शृणोमि।

(अन्यतः प्रविशन्ति काश्मीरका दुर्वृत्तपण्डिताः)

दुर्वृत्तपण्डितानामेकः। अये! पश्यत पश्यतादूरेऽसौ शिष्यसमन्वितः साधुः। नूनमसावेव स यथा काश्मीरे आसीद्दृष्टः।

अन्यः। (निपुणं विलोक्य) निश्चितमसावेव सः, न कश्चन सन्देहः।

सर्वे। ततो वयमेतौ बलान्निष्पिष्य बोधायनवृत्तिग्रन्थं स्वराज्यं नेष्यामः। अहो खल्वानन्दः।

दुर्वृत्तानामेकः। (रामानुजमुद्दिश्य) अये चौर! अये दुष्ट! साहसिकोऽसि साधुर्योऽस्माकं धनमनायासं स्वगृहं नयसि। देहि द्रुतं देहि बोधायनवृत्तिग्रन्थमन्यथा युवां मारयिष्यामः कुट्टयिष्यामः। पश्य यष्टिखण्डमसिञ्च।

कुरेशः। यष्ट्याऽसिना वा किम्? किन्तु यूयमेवास्य ग्रन्थस्य स्वत्वाधिकारिण इत्यत्र किं प्रमाणम्? ग्रन्थ एष मम गुरवे स्वयं सरस्वतीदेव्या प्रदत्तः।

दुर्वृत्तानामन्यतमः। अहो! आख्यानमालायाः सर्वोत्तममुपाख्यानं काल्पनिकमपि सुन्दरम्। किन्तु का कुत्र वा सा सरस्वती देवी? साऽद्य युवां रक्षतु।

कुरेशः। अवश्यमेव सावां रक्षिष्यति। सा विश्वजननी सर्वान् रक्षति।

दुर्वृत्तानामन्यतमः। तव जननी त्वां रक्षतु। किन्तु बोधायनग्रन्थं नः प्राथम्येन देहि।

रामानुजः। कुरेश! देह्येतेभ्यो ग्रन्थम्। जननि भारति! एतदेव तव हृदय आसीत्।

[दुर्वृत्तेभ्यो ग्रन्थरत्नं दीयते ते सोल्लासं बहिर्गच्छन्ति]

रामानुजः। (ध्यानपरायणः) जननि! तव स्वरूपवैशिष्ट्यं प्रकटीकर्तुं प्रयतमानोऽस्मि। किन्तु कथम् एता बाधाः?

(सरस्वतीस्तुतिः)

नाद-पूर्णब्रह्मस्वरूपिणि!
निगमागमप्रभे! तमोदलनि!
मधुरमोहनवीणावादिनि।
वाणि स्फटिकमालाधारिणि
करुणामसृण-कमनविलोकिनि ॥११४॥

कुन्दकर्पूरधवलहासिनि
सौम्ये सारदे सारदायिनि।
श्वेतकमलामलदलविहारिणि
सितचन्दनचर्चित-वरवर्णिनि
भजानि भारति भास्वति भरणि ॥११५॥

कुरनाथः। अहो मधुर-मधुरं गुरुदेवकृतं सङ्गीतम्। मूर्तिमतीव देवी सरस्वत्यस्मत्समीपे राजते।

रामानुजः। देवि! युगे युगे सर्वानेव भक्तान् कृतकृतार्थान् त्वमकरोः? नाहमस्मि भक्तः; केवलं तव पदाश्रयेण जीवामि।

धृति-पुष्ट्यादि-देहाष्टकधारिणि
व्यासकालिदास-कवित्वदायिनि।
सरस्वति स्मृतिमेधाविधायिनि
कुमतिहारिणि सर्वशक्ले जननि ॥११६॥

भ्रमनिरसनकर-तत्त्वविकाशिनि
मधुरिममय-मधुवीणावादिनि
परम-ममतामयि यतीन्द्रजननि
भजानि भारति भास्वति भरणि ॥११७॥ *

(इति स्तोत्रं गायन् दरविगलितधारयाऽश्रुनिषेकं करोति)

किन्तु जननि कथं वा ग्रन्थं त्वं मह्यं दत्तवती, कथं वा मत्तोऽपसारितवती ।

कुरेशः । देव गुरो ! अलं चिन्तया । काश्मीर-देशान्मासात् पूर्वं वयं प्रस्थिताः । ततः प्रभृति प्रतिरात्रं यदा भवान् सुप्त आसीत्तदा मया वृत्तिरेषा पठिता, तत्फलेन सर्वमेतं ग्रन्थमहमक्षरशो जानामि । पञ्चष दिवसैर्मया पुनर्लिखितो ग्रन्थो भवतां सहायको भवेत् महाजननी-कृपया ।

रामानुजः । कुरेश प्राणाराम जीवनानन्द ! अतोऽसि त्वं मम प्रियश्रेष्ठः । बोधायनवृत्तिग्रन्थस्य प्रयोजनं ब्रह्मसूत्रभाष्यविरचनाय । प्राथम्येन त्वं कुरु ग्रन्थस्य स्वस्मृतिधृतस्य पुनर्लेखनम् । अचिरेण कालेनाहं भाष्यविरचन-कर्मणि प्रवर्तिष्ये ।

जननि भारति ! त्वं सुप्रसन्ना भव ।

———

द्वितीयदृश्यम्

(ततः प्रविशन्ति रामानुजः कुरनाथोऽन्ये च शिष्या.

रामानुजः। (सर्वान् शिष्यानुद्दिश्य) भो, भागवतोत्तमाः! युष्माकं भक्तिबलेन कुरेशस्यासाधारण-मेधाशक्तिप्रभावेण च बोधायनवृत्तिर्मया संगृहीता। ये कुदृष्टयः "तत्त्वमसि", "अहं ब्रह्मास्मि" इत्यादि-वाक्यानामर्थज्ञानं निःश्रेयसस्य मोक्षप्राप्तेर्वा कारणं मन्यन्ते, अथवा ज्ञानकर्म-समुच्चयवादिनः अर्थज्ञानेन सह यज्ञदानतपःकर्मणामत्यावश्यकतां स्वीकुर्वन्ति—अद्याहं तेषामदूरदर्शिनां मतं खण्डयित्वा, ध्यानोपासना-भक्तिभिर्मोक्षलाभ एव वेदवेदान्ताभिप्रायः इत्येतन्मतं प्रतिपाद्य श्रीभाष्य-रचनायै प्रोत्सहे। तद् यूयमभिलषितस्यैतस्य निर्विघ्न-परिसमाप्त्यर्थं भगवत्पादपद्मे कुरुत प्रार्थनम्।

वत्स कुरेश! त्वं भव मम व्यासस्येव गणेशः। यदा भाष्य-निबद्धव्यां काञ्चन युक्तिं त्वमसमीचीनां मंस्यसे, तदा त्वं क्षणं विलम्बिष्यसि। मम युक्तिं पुनर्विविच्य यदि भ्रमात्मिकां मन्ये, तदा-वश्यमेव तस्याः परिवर्तनं करिष्ये।

कुरनाथः। अथकिं देव! सर्वमेतदस्माकं महते हिताय सुखाय च भविष्यति। अहो! भागवतधर्मस्य प्रकृष्टं रूपं दर्शनमार्गेण जना ज्ञास्यन्ति, इतोऽभ्यधिकं सुखं किं वा स्यात्। प्राणान् पणं कृत्वाऽहं श्रीभाष्यप्रणयने साहायकं विधास्ये।

रामानुजः। तदहं निश्चितं जानामि। अत एव त्वमसि प्रियतमः शिष्यो मे।

वत्स! श्रीरङ्गधाम्नि प्रत्यावर्तनादनन्तरं यद्यन्मयोक्तं, तत्र क्वापि तव वैमत्यमस्ति वा?

कुरनाथः। देव! भवान् कथयति जीवः स्वरूपतो नित्यो ज्ञाता च। एतद्विषये भवता पुनरपि विवेचना करणीया।

रामानुजः। तात कुरनाथ! सुष्ठूक्तं त्वया। जीवो यदि स्वरूपतो

नित्यो ज्ञाता च भवति, तदा का हानिर्जीवस्य स्वतन्त्रताया देहाभिमानविशिष्टतायाश्च ख्यापने ? किन्तु भगवान् वदति—

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥

ततो जीवो निश्चितं परतन्त्र एव, न स्वतन्त्रः । जीवः सर्वथेश्वराधीनः, तस्मादसौ ईश्वरस्यांशः शेषो वा—ईश्वरश्च भवत्यंशी शेषी वा । एतदेव सुष्ठु, एतदेव समञ्जसम् ।

कुरनाथः । देवदेव ! अतीवानुकूलं स्थानमिदं, समयश्च सुमधुरः । मनो मे कथयति एष एव श्रेष्ठः प्रारम्भसमयः ।

देशः श्रीरङ्गनाथाभिध-परमविभोर्नित्यलीलापवित्रः
श्रीरङ्गाख्यः, प्रभातं पुनरिदमखिल-प्राणिचैतन्यरूपम् ।
चैतन्योदग्र-धर्मस्त्वयि निहितपदो राजते चाद्य विश्वे
प्रारब्धव्यं गुरो तद् भवदभिलषितं ब्रह्मसूत्रस्य भाष्यम् ॥

श्रीरामानुजः ।

त्वं मे मूर्तिमती दया भगवतः श्रीमन् कुरेश ! क्षितौ
प्रज्ञा पौरुषविग्रहं धृतवतीवालोक्यसे त्वं मया ।
वृत्तिं षड्भिरहोभिरात्महृदये बौधायनीमङ्कयन्
स्मृत्या तूलिकया गुरोरनृणतां यातोऽस्ति धन्यो भवान् ॥

कुरनाथः । सर्वं गुरोः कृपानुसारि ! भगवन् प्रारभस्व । भवतामाशीर्वादेन न मे कश्चन प्रमादो भूयात् ।

श्रीरामानुजः । कथं प्रमादः ? भगवान् तव चिरसहायः । प्रारभे ब्रह्मसूत्रभाष्यम् । लिख—

"ब्रह्मसूत्रभाष्यम्

अखिल-भुवन-जन्म-स्थेम-भङ्गादिलीले
विनत-विविध-भूतव्रात-रक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिञ्छेमुषी भक्तिरूपा ॥

पाराशर्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपन-व्यपगतप्राणात्म-संजीवनीम् ।
पूर्वाचार्यसुरक्षितां बहुमति-व्याघात-दूरस्थिताम्
आनीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥”

कुरनाथः । अहो मधुरं मधुरम् !

रामानुजः । पुनरपि लिख ।

“भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।”

कुरनाथः । प्रभो ! अवहितचित्तोऽहं लिखामि ।

रामानुजः । भगवद्बादरायणिकृतब्रह्मसूत्रस्य प्रथमसूत्रस्य भाष्यं साम्प्रतं लिख ।

“अथातो ब्रह्मजिज्ञासा इति—

अत्राथशब्द आनन्तर्ये भवति । अतः शब्दो वृत्तस्य हेतुभावे, अधीतसाङ्ग-सशिरस्कवेदस्य अधिगताल्पास्थिरफल—केवल-कर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिर-फल-ब्रह्मजिज्ञासा ह्यनन्तरभाविनी ।

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । * * *

ब्रह्मशब्देन स्वभावतो निरस्तनिखिलदोषोऽनधिकातिशयासंख्येय-कल्याण-गुणगणः पुरुषोत्तमोऽभिधीयते । सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः । बृहत्त्वञ्च स्वरूपेण गुणैश्च यत्रानधिकातिशयं सोऽस्य मुख्योऽर्थः, स च सर्वेश्वर एव, अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तिः । तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः अनेकार्थकल्पनयोगाद् भगवच्छब्दवत् । तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः ।”

कुरनाथः । भगवन् ! सुप्रसन्नं मे चेतः; रोमाञ्चाकीर्णो मम देहः ।

रामानुजः । वत्स ! भगवत्सक्तोऽसि त्वम् । तवानन्दातिरेकः स्वाभाविक एव । ब्रह्मनामकरणेन ब्रह्मणामविश्लेषणेन चानन्दो मे उद्वेलित एव । अहो ब्रह्मानन्दः (इति समाधिस्थो भवति) ।

कुरनाथः। भ्रातरः! अस्मिन् क्षणे हरिनारायण-लक्ष्मीनामानि समुद्गेयानि येन सहसा गुरोः समाधिभङ्गो भवेत्। अहो भगवत्प्रेषितेवेयं माता लक्ष्मीनारायणगानपरायणा इत एवायाति।

(प्रविशति काचन भिक्षुरमणी गायति च)

(नारायणस्तुतिः)

भवभयच्छिदं श्रीपतिपदारविन्दं वन्दे ॥
कोटिपारिजातमकरन्दं नियतसरद्विश्वानन्दं
सच्चिदानन्दममन्दं वन्दे।
गुणमन्दिरं दामोदरं गोविन्दं वन्दे
भवमथनमन्दरं सुन्दरातिसुन्दरं नन्दवृन्दानन्दं
मुकुन्दं वन्दे ॥११८॥

(लक्ष्मीस्तुतिः)

शुद्धसत्त्वस्वरूपा त्वं भक्तानुग्रहविग्रहा।
राज्य-स्वर्गगृहश्रीश्च मिताचारसुखावहा ॥११९॥
विष्णुलक्ष्मीः स्वभूलक्ष्मीः शिवलक्ष्मीः सुरार्चिता।
सर्वदेवमयी लक्ष्मीः कमला कमलाश्रिता ॥१२०॥
करिकरजलस्नाता कृपामयी सदा हिता।
शुभप्रस्रवणा देवी नितरां पतिवन्दिता ॥१२१॥
विश्वलौल्यपराकारा लोला ख्याता पतिव्रता।
संसाररक्षणासक्ता यतीन्द्रसुतपूजिता ॥१२२॥

कुरनाथः। अहो मधुर-लक्ष्मीनारायणनामश्रवणेन प्रभुः पुनराप्नोति चैतन्यम्।

रामानुजः। का त्वगायत्? अहो! मधुरिममयी गीतिः।

भिक्षुकरमणी। देव! सङ्गीतजीविनीयं तव कन्या। अपि तव ब्रह्मनामास्वादने नारीणामस्त्यधिकारः?

रामानुजः। कथं न? जीवात्मा यथा नार्यां तथा पुरुषे। लक्ष्मी-स्वरूपिणी सर्वेषां सदा पूज्या।

कुरनाथः। पुनरपि सर्वे लक्ष्मीनारायणस्तुतिं गायत।

(सर्वे निष्क्रान्ताः।)

तथोद्दशोऽङ्कः

[रामानुजस्य दिग्विजयः]

तत प्रविशतः कुरेशो रामानुजश्च ।

रामानुजः । कुरेश ! चोल-पाण्ड्य-मालावार-प्रभृतीनि दाक्षिणात्य-प्रसिद्धस्थानानि दृष्ट्वा समागतोऽस्मि काश्मीरं भूस्वर्गम्। अहो अपूर्वमत्र नैसर्गिकं दृश्यम्। भगवान् विश्वस्य सर्वं प्राकृतिकं सौन्दर्यम् पिण्डीकर्तुमना अतिक्रमितुमना वा कश्चित् सर्वसौन्दर्यातिशयमत्रैव ततान ?

एकत उत्तुङ्ग-हिमाचलशृङ्गभूभागोऽन्यतश्च वेगवती तटिनीधारा—सर्वत्र नीलनीलिमराशिः; स्थाने स्थाने च तुषारस्तूपविभूषिता पर्वतचूडा। गायन्ति शतं पक्षिणः; अदूरतः प्रवहति भीषणगजनेन स्रोतस्विनी। असंख्यातानि पुष्पाणि नयनविलोभनानि सर्वत्र प्रस्फुटितानि। फलतः शतयोजनव्यापिनि हिमालयवक्षोदेशे कथं वेयं प्रशस्ततमसमतलात्मिका बहुयोजनव्यापिन्युपत्यका ? का नामेयं विभूतिः, किंनामकं वैतत् सौन्दर्यं, पृथिव्यां कुत्र वाऽस्य तुलनम ?

कुरेशः । स्थानस्य माहात्म्यं सौन्दर्यं सत्यं नु बहुप्रसारि। किन्त्वधिवासिनो न तादृशप्रशस्तहृदया दृश्यन्ते। विद्वेषपरायणा एते नान्येषां सुखान्वेषिणः । एतद् दुःखकरम् ।

रामानुजः । वत्स ! जगति को नाम देश आस्ते यत्र सर्व एव समानौदार्यपरायणाः ? जगति सर्वत्र सतां सङ्गः पुण्येन भवति। सज्जनसङ्गं न लभामहे चेदस्माकमेव दौर्भाग्यं दोषो वा । तद् यातु, परं काश्मीर-नरेशेन किमर्थं मम दर्शनं प्रार्थितमिति न जानामि ।

कुरेशः । दौरात्म्यं तद्विदग्धानां श्रुतवान् स जनाननात् ।
वीतमन्युं विधातुं त्वां मन्ये स्वयमुपैष्यति ॥१२७॥

रामानुजः। कुरेश ! सुरा असुराश्च पार्श्वत एव वर्तन्ते। आलोक-पार्श्ववर्ती अन्धकारः। सतुसङ्गविरलेऽस्मिन् स्थाने भगवान् सातिशय-कृपायुक्तो मां हयग्रीवाकारेण तोषितवान् इति कथं विस्मरामि।

किन्तु काश्मीरभूपतिः कथं विलम्बते ?

कुरेशः। कस्यचन पादशब्दमिव शृणोमि। निश्चितमसौ समागत एव।

(ततः प्रविशति काश्मीर-भूपतिः)

काश्मीरभूपतिः। देव ! काश्मीरनरेशस्य प्रणामाञ्जलिं गृह्णातु भवान्।

रामानुजः। राजन् स्वस्त्यस्तु ते।

धन्यः काश्मीर-देशश्चिरमिह कवयोऽलङ्कृतिज्ञप्रधाना
वेदान्ताश्चाथ भूपा अपि विमलधियस्त्वादृशाः संबभूवुः।
स्वाभाविक्यस्य शोभा भृशमभिभवति क्षेमिणीं स्वर्गलक्ष्मीं
सोऽयं शीर्षण्यभूतो भरतभुव इति प्राहुरार्याः पुराणाः ॥१२४॥

काश्मीरभूपतिः।

काश्मीरका वयमभूम विभो कृतार्था
यद् दाक्षिणात्यविषयात् त्वमगाः सुदूरात्।
अभ्रं लिहा अमरमन्दिरवृन्दचूडा
विस्माययन्त्यहह विश्वजनान् हि यत्र ॥१२५॥

किञ्च,

वेदवेदान्तमीमांसा-सारविद् बहुला जनाः।
कृष्णागोदावरीरेवास्तन्यपीयूषपायिनः ॥१२६॥

देव ! अस्मद्देशवासिनः पण्डिता न भवन्तं प्रति सम्माननं यथोचितं प्रदर्शितवन्तो भूयो भवतामपकारं च कर्तुमुद्यता आसन्निति परिज्ञाय नितरां क्षुब्धं मे मनः। एतदर्थं त्वां क्षमापयितुं समागतोऽस्मि।

रामानुजः। राजन् ! तद्दौर्भाग्यं ममैव। मम प्राणापहरण-प्रचेष्टाहेतोः स्वयं हयग्रीव एतान् प्रति रोषपरायण आस्ते। भवतु, यस्य देशस्य राजा भवांस्तस्य देशस्य न कोऽपि विपत्पातोऽस्मद्धेतोर्भवेत्।

कुरेशः। माहात्म्यं महन्मम गुरुदेवस्य यत् स्वीयप्राणापहारकमपि न द्वेष्टि; यथा मित्राणां तथा शत्रूणां सर्वेषां समं हितं वाञ्छति।

काश्मीरभूपतिः।

लोकोत्तरं चरितमेतदचिन्त्यभावं
सञ्चिन्तयन्मन उपैति हि विस्मयं मे।
यस्मिन्ममं निजजने परतः परेषु
लोकेषु तिष्ठति पुनर्ममताविलीनम् ॥१२७॥

देव! भवतां श्रीचरणकमले कोटि-कोटि-प्रणामा दासस्य।

रामानुजः। राजन्! स्वस्त्यस्तु ते तव च देशवासिनां सर्वेषाम्।

[आकाशवाणी]

राजन्! सशिष्य साधकप्रवर! यूयं सर्वे शृणुत। अहं सारदापीठाधिष्ठात्री श्रीसरस्वती देव्युद्घोषयामि—यतो बोधायन-वृत्त्यनुसारि भाष्यं सर्वातिशायि, ततोऽद्यप्रभृति जगति भाष्यमिदं श्रीभाष्यनाम्ना समुदाहृतं भविष्यति।

रामानुजः। मातः! कृतार्थोऽस्मि।

भूयोभिरप्यभिहतेन मयान्तरायै-
र्ग्रन्थच्छलेन भवती यदसेवि देवी।
अम्ब! प्रसीदसि ततो यदि मय्यनाथे
नाथे न किञ्चिदपि तर्हि जगत्त्रयेऽहम् ॥१२८॥

[सर्वे निष्क्रान्ताः]

———

चतुर्दशोऽङ्कः

[यतिराजेन तृतीय-प्रतिज्ञायाः पालनम्]

कुरनाथः प्रविशति।

कुरनाथः। अहो महान् मे आनन्दः, परजातशिशुपुत्राशीर्वाद-मुखेन मम, मत्पत्न्या अण्डालदेव्याश्चानन्दवर्धनार्थं गुरुर्मेऽद्यात्रा-गमिष्यति। तत् केनोपायेन तस्य यथायथं परिचर्यां विधास्यामि?

अथवा,

अलमलमुपचारचिन्तया धनमहिमविकाशसारया।
मम किल शरणागतिर्गुरोश्चिरमिह परितोषसाधनी॥१२६॥

अये गुरुदेव आगत एव।

[रामानुजः प्रविशति]

रामानुजः। अशीत्यधिकनवशततमशकाब्दस्य शुभकृन्नामकवर्षे वैशाखपूर्णिमायामनुराधानक्षत्रे यस्य पुत्रद्वयं जातं तस्य महोन्नतिं कामये। कामयेऽण्डालदेव्याः शुभम्। शुभं च पुत्रद्वयस्य।

कुरनाथः। देवदेव! भवन्तं साष्टाङ्गं वन्दे। [पादयोः पतितः]

रामानुजः। [पादपतितं कुरेशम् आशिषो ददाति] कुरनाथ! महापुरुषस्य भविष्यदृष्टिं प्रत्यक्षीकुरु। श्रीश्रीप्रभुयामुनाचार्यस्य दूरदृष्टिप्रभावात् तस्य प्रोद्बोधबलेन च मया कृतमासीत् प्रतिज्ञात्रयम्। इतः पूर्वं श्रीभाष्यं रचितं द्राविडाम्नायश्च भूयसा सुप्रचारीकृतः। अद्य परिपालयिष्यते महासुखेन मम तृतीया प्रतिज्ञा। पराशरनाम तथा व्यासदेवनाम च तव पुत्रद्वयाय दास्येते; तथा परांकुशपूर्णनाम च गोविन्दानुज-बालगोविन्दसुताय दास्ये।

कुरनाथः। भवतां कृपया भागवतधर्मः प्रतिजनं द्वारि द्वारि संप्रचारितो भवतु। गेहे गेहे च पराशर-वेदव्यास-शठकोपा जायन्ताम्। श्रीभाष्यस्य महामहिमा जगतो दिग्दिगन्तं करोतु परिव्याप्तम्।

रामानुजः। श्रीभाष्यस्य सम्पादने तथा च प्रचारणे तव श्रमो भाषातीतः। सर्वशुभकामनयाशेषहितसाधनेन चाण्डालदेवी कतिकतिजनसेवां न प्रतिदिनं कृतवती। युवयोः पुत्रौ सर्वथा सुखिनौ धर्मप्राणौ धर्मसंप्रचारकौ च भवताम्।

श्रीकृष्णो यानि पञ्चास्त्राणि धारयति—(पाञ्चजन्यं सुदर्शनं, कौमुदकी, नन्दनं, शार्ङ्गञ्च) अहं तव पुत्राभ्यां सौवर्णानि तानि पूर्वमेव दत्तवान्। तौ जगतां महते हिताय यतिष्येते। किञ्च,

पराशरोऽयं क्षुरधारबुद्धिः सर्वज्ञभट्टप्रभृतीन् सुधीरान्।
विद्याविवादे परिभूय बाल्ये काले यशस्वी भविता विशेषात्॥

[अण्डालदेवी कुरनाथश्च गुरुसेवां कुर्वाते]

पञ्चदशोऽङ्कः

(प्रथमदृश्यम्)

[धनुर्दासविजय-वृत्तान्तः।]

ततः प्रविशतो रामानुजो धनुर्दासश्च।

रामानुजः। अहो आश्चर्यमेतद्यत्त्वं शतसहस्रजनानां चक्षुर्बाणमुपेक्ष्य रमणीं वीक्ष्यमाणो राजपथे चलसि। तत एवानीतोऽसि मत्समक्षम्।

संक्षोभयत्येव मनो निकामं कामो जनानामजितेन्द्रियाणाम्।
न लोकलज्जा तदपीह वर्ज्या यतस्तयैव ध्रियते समाजः॥१३१॥

धनुर्दासः। आचार्यदेव! किमहं करोमि। तस्या देव्या हेमाम्बाया नयनसदृशं सुशोभनं किमपि नाहं पश्यामि।

रामानुजः। धनुर्दास! यद्यहं ततोऽपि शतशोऽभ्यधिकसुन्दरं नयनयुग्मं दर्शयेयम्, ततः किं भवेत्?

धनुर्दासः। निश्चितमेव हेमाम्बां विस्मरिष्यामि, तादृशनयनयुगलशालिनः पद्पङ्कजसेवायाम् आत्मानं नियोजयिष्यामि च। किन्त्वाचार्य !

दृष्टेर्विलक्षणतया रुचिभेदतो वा
सर्वो न सर्वमपि वस्तु पुरस्करोति।
द्रव्यं भवेद्रुचिकरं मम यन्नितान्तं
तच्चापरस्य रुचये न भवेद्पीह ॥१३२॥

इत्येवं विचिन्त्य भवता कर्मणि प्रवर्तितव्यम्।

रामानुजः। तदेहि मया सह। [उभौ श्रीरङ्गनाथस्वामिनो वृहदायतनद्वाराण्यतिक्रम्य मूलविग्रहसमीपमायातौ। अर्चको यतिराजं सन्दृश्य भवभयहारिणं भुजगशयनं लक्ष्मीपतिं नारायणमारात्रिकविधानेन पूजयति।]

रामानुजः। धनुर्दास ! सकृत् साम्प्रतं भगवन्तं लक्ष्मीपतिं पश्य।

धनुर्दासः। अहो आनन्दः, अपूर्वः खल्वानन्दः !

[यतिराजस्य पादमूलमाश्रित्य]

देवदेव ! अद्य परमभागवतस्त्वं कृपया मादृशाय नराधमाय दिव्यचक्षुर्दत्तवान्। तदर्थं त्वच्छ्रीचरणपङ्कजयोर्दासानुदासोऽहं सञ्जातः। एतावत्कालपर्यन्तमहं महासागरं तुच्छीकृत्य कूपमण्डूकसमः कूपाश्रयमेवामृग्यम्, सर्वसौन्दर्यस्य वीर्यस्य चाकरं भगवन्तं मरीचिमालिनमुपेक्ष्य निशाचरः पेचक इव खद्योतिकारूपेणामुह्यम्। धिक् मां बुद्धिलेशहीनमधन्यम्। मादृश-मूढजनस्य मोहविनाशे भवादृशो महापुरुष एव केवलं समर्थः, नान्यः कोऽपि।

रामानुजः। परमपितरं लक्ष्मीनाथं श्रीरङ्गनाथं स्मर; तस्याश्रयं भज। हेमाम्बा न त्वां परित्यक्ष्यति। मद्गृहसन्निकटस्थाने गृहं निर्माय त्वं हेमाम्बया सह वासं कुरु।

धनुर्दासः। महानयमनुग्रहो देवदेवस्य। युगयुगान्तरीय-भवत्स्नेहक्रीतदासोऽहमस्मि। देव ! अतुलनस्तव स्नेहो यथा भगवतः। अथवा त्वमेव भगवान् श्रीमदाचार्यरूपेण साम्प्रतं जगति विराजसे।

(उभौ निष्क्रान्तौ)

द्वितीय-दृश्यम्

(दृश्यते हेमाम्बा शयाना। चौर्यरता ब्राह्मणशिष्याः।)

शिष्यचौराः। (नीचैः) क्रमेण नीता एकतोऽलङ्काराः। सेयं पार्श्वपरिवर्तनं कुर्वती जागरितेव प्रतिभाति। तद् गच्छामः। पुनः कोऽपि बहिर्देशादायाति।

(ततः प्रविशति धनुर्दासः)

धनुर्दासः। प्रिये हेमाम्बिके! तव गात्राभरणान्येकपार्श्वतः क्व गतानि?

हेमाम्बा। आर्यपुत्र! प्रभो! मम निद्राकाले केचन ब्राह्मणाश्चौर्यपरायणा मम देहस्यैकांशत एवालङ्करणान्यपाहरन्, यतस्तेषां मद्गृहे प्रवेशकालेऽहं भगवन्नामावलीं शयनावस्थायामेव जपन्त्यासम्। ते तु तथाभूतां मां निद्राभिभूतां मन्यमाना मद्गात्रादलङ्करणानि नीतवन्तः। परतः पुनः पार्श्वपरिवर्तनहेतोर्मां जाग्रतीं ज्ञात्वा बहिरगच्छन्। अहो मम दौर्भाग्यम्!

धनुर्दासः। अहो परा काष्ठा तव दुर्भाग्यस्य। पार्श्वपरिवर्तनं कृत्वा त्वमसि स्वसौभाग्यच्युता। नाद्यापि तवाहङ्कारो दूरं गतः। मम देहो ममालङ्कार इत्यादि-दुर्बुद्धिहेतोस्त्वमस्यद्य काञ्चनविष्ठावहनभारपिष्टा।

हेमाम्बाहं भूयसां काञ्चनानां
स्वामिन्यस्मीत्युर्वहङ्कारदृप्ता।
पार्श्वेन त्वं यत् तदावर्तितासी-
मुक्तेर्मार्गात् प्रच्युता तत् तदैव ॥१३३॥

अत एव यदि वाञ्छसि मुक्तिमात्मीयत्वबुद्धिलोपं कुरु, अहंकारं समूलमुन्पाटय।

हेमाम्बा। सत्यं न्वार्यपुत्र! अहं भृशं दुःखितास्मि। भवदाशीर्वादैस्तथा भवतु यथेतः परमपि मम मनसीदृशो मोहो न लभेत पदम्; यथा च पुनर्न भवाम्यहङ्कारमलिना।

धनुर्दासः। एष एव समयः श्रीगुरुचरणसेवनाय। श्रीगुरुचरण-सेवनेन सर्वं पापं दूरमियात्। (तन्मयतया गुरुं प्रार्थयते)

एकोऽक्षमोऽस्मि भवसागरमुत्तरीतुं
दीनस्य मे सहचरो भव तद् गुरो त्वम्।
श्रीरङ्गनाथ-विभुनाम तरीमुपेत्य
त्वन्नाविकामहमगाधममुं तरेयम्॥१३४॥

(ततः प्रविशति द्रुतं श्रीरामानुजाचार्यः सशिष्यः)

श्रीरामानुजः। पश्यत पश्यत शिष्याः! तुलनद्वारेण युष्माकं शिक्षणाय मयैवैतच्चौर्यमनुष्ठापितम्। युष्माभिः स्वयमेवाकर्णितं यदेताभ्यां दम्पतिभ्यां जल्पितं कल्पितं च। एतयोरनुरागो दाने, स्वर्ण-विष्ठाभारापनयने। युष्माकं रतिस्तु कुत्र? यदा पूर्वेद्युर्मया युष्माकं वस्त्राणां क्षुद्रखण्डानि नीतानि तदा किं न युष्मोभिः कृतम्? किं किं वा न कथितम्?

अयि वत्साः! स्मरत चिरम्—

न जातिः कारणं लोके गुणाः कल्याणहेतवः।

हेमाम्बिके मातः! सर्वमेतदैच्छिकमनुष्ठितं मया। तवात्मस्वरूपो-द्घाटनेन त्वं मामतीव तोषितवती। तव परमोन्नतिर्भूयात् तव कृते तव पत्युः कृते च यत् सर्वमनुष्ठितं तच्चिरसार्थकम्।

लक्ष्मीसमेतः स्वामि-श्रीरङ्गनाथो विजयताम्।

[सर्वे निष्क्रान्ताः]

षोडशोऽङ्कः

[अथ कुरेश-कृमिकण्ठ-संवादः]

[ततः प्रविशति दण्ड-कमण्डलुहस्तो रामानुज-वेशधारी कुरेशः]

कुरेशः ।

क्रूरोऽयं शिवभक्त-चोलनृपतिर्यद् वैष्णवद्वेषतो
निर्वैरं महिमोन्नतं मम गुरुं विद्वेष्टि रामानुजम् ।
रोषाद् भूमिपतेर्गुरुं स्वमवितुं तद् दण्डपाणेर्मया
वेशः कैतवतो यदेष विहितस्तन्मे गुरुर्मृष्यतु ॥१३४॥

अहो परमानन्दः! यद्दुर्घटनसम्भावनातो दूरं नीतोऽस्ति मम गुरुः श्रीरामानुजः। क्षुद्रोऽहं, मम प्राणनाशेनापि किम् ? इह स्वयं भगवान् गुरुरूपेणान्तिके सदा वसति। विशेषतः कुतो मम गुरोर्महाप्राज्ञस्य श्रीभाष्यावतारकारणस्य तुलनम् ?

एतस्य महाजीवनं येन केनाप्युपायेन संरक्षणीयमेव। भगवांस्तथा करोतु यथा श्रीगुरुरूपधारिणं मां नैष चोलराजस्तत्त्वतो जानीयात्—स मां सर्वथा श्रीरामानुजमेव जानातु। मन्ये कृमिकण्ठनामकश्चोलाधिपतिरित एवायाति।

(प्रविशति चोलाधिपतिः कृमिकण्ठः)

चोलराजः। (स्वगतम्) अहो सौभाग्यम्! शैवविरोधि-वैष्णवधर्म-प्रचारकारी रामानुजोऽत्रानीतः। अद्य येन केनाप्युपायेनास्य शैवभक्तिः सर्वसमक्षे स्वीकारणीया ततोऽधिकं सर्वत्र प्रचारयितव्या च। मयि परमशैवे जीवति कथमेष हठकारी मद्राज्यवासी वैष्णवधर्मस्य महिमानं प्रोद्घोषयेत्। कथम् ? अपि नाहं मम महाप्राज्ञ-पितृपुरुषाणां पदाङ्कधारी ? मम करौ श्लथौ बलहीनौ वा ? तथापि—

यद् ब्रह्मरक्षःकृत-निग्रहात् प्राक्
सम्मोचिताऽनेन सहोदरा मे ।
स्मृत्वोपकारं कृतपूर्वमेनं
नो जीवनादेष वियोजनीयः ॥१३५॥

(प्रकाशम्) भो आचार्यप्रवर! परमकृपया परिगृह्यतां दीनगृहे मम दीनतमासनम्। भवच्छ्रीमुखात् सदालापश्रवणमानसोऽहं भवन्तमत्रानीतवान्। मम सभापण्डिता अपि भवता सह वाक्यालापसमुत्सुकाः। ततः सानुग्रहं वदतु भवानस्मद्विधानां किं करणीयमिति।

रामानुजवेशधारी कुरेशः। भो राजन् राजसभापण्डितवर्याश्च! सर्वलोकपावन-श्रीविष्णुरेव आब्रह्मस्तम्बपर्यन्तं सर्वेषामुपास्यः।

चोलराजः। (सरोषः) अये! पाण्डित्याभिमानिन्! तव भक्तिपाण्डित्यविषये मम महान् विश्वास आसीत्। अद्य पश्यामि त्वं सत्यं महाभण्डोऽसि। अन्यथा कथं त्वं सर्वलोकहारकं त्रिलोकगुरुं हरं परित्यज्य विष्णुं पूजयितुं मामुपदिशसि? एषा तव दुष्टा प्रवृत्तिरितरसाधारणी। यः सर्वसंहारकारी कालमपि संहृत्य महाकाल इति ख्यातिमाप्तवान्, कालेन विष्णुरपि यस्य करयोर्नाशमेष्यति, तं सर्वशक्तियुतं शिवं परिहाय करोषि त्वं दुर्बलस्य विष्णोः संपूजनम्? तस्मादस्यधमस्त्वमर्वाचीनस्तुलनाहीनः। यथा तथा भवतु—एषेतररुचिकरी विष्णुप्रीतिस्त्वया त्यक्तव्यैव। तत् कथय—

"शिवात् परतरो नास्ती"ति।

कुरेशः। कथम्?

"द्रोणमस्ति ततः परम्"

(ध्यानमग्नो यामुनाचार्यविरचितं स्तोत्रमुच्चारयति)

"नमो नमो वाङ्मनसातिभूमये
नमो नमो वाङ्मनसैकभूमये।
नमो नमोऽनन्तमहाविभूतये
नमो नमोऽनन्तदयैकसिन्धवे॥"

चोलराजः। (उच्चैः) भो राजपुरुषाः! एनं दुरात्मानमचिरान्मदग्र एव कुरुत चक्षुर्हीनम्। चक्षुर्द्वयमस्योत्पाटयत।

अस्य प्राणान्न नाशयत, यतो बहोः कालात् प्राङ् मम भगिन्याः प्राणा अनेन संरक्षिताः। किन्तु चक्षुर्विनाशो मर्मकृन्तनपर एवास्य दण्डो विधेयः।

राजपुरुषाणामन्यतमः। राजादेशादवश्यमेवासौ नेत्रहीनो विधास्यते। (कुरेशमुद्दिश्य) रामानुज! आत्मानं सज्जीकुरु।

कुरेशः। क्षणं तिष्ठ। भगवत्सकाशे कृतज्ञतां निवेदयामि; तदर्थं निमेषद्वयमपेक्ष्यतां भवद्भिः।

(ध्यानस्थितः) भगवन्! नैते जानन्ति किमेते कुर्वन्ति। यो योऽपराधो जातः स सर्वो ममैव, नैतेषाम्। विभो!

जानन्ति के ते मधुरं हि चेतः
कारुण्यधारामथ तामपाराम्।
त्वं हेतुना केन करोषि किं वे-
त्स्यज्ञाततत्त्वा मनुजा भ्रमन्ति ॥१३६॥

अद्यतनसंघटनेऽहमेवापराधी, न चोलाधिपतिर्नवा राजपुरुषाः।

राजपुरुषाः। अपि समाप्ता तव प्रार्थना। तदायाहि भगवत्-कृपालाभाय। राजानं पश्चात् कुरु। स्थिरो भव।

[प्रयत्नबलेन राजपुरुषो महाजनस्य कुरेशस्य चक्षुर्द्वयमुत्पाटयति। बहिर्झञ्झावायुः प्रवहति। क्षणात् समायातो घनान्धकारः। प्रलयकाल इव समुपस्थितः।]

चोलराजः। अतः परं यथेच्छं भगवन्तमाह्वय। न तव विष्णुदेव-स्त्वां रक्षितुमास्ते समर्थः। स्वदुष्कृतकर्मफलमेवाप्नुहि। (सर्वतो विलोक्य) किन्तु किमेतत्?

उत्पाट्योत्पाट्य कूटान् प्रलय इव महावायवो वान्ति घोरा
हृत्कम्पी कर्णपीडामुपनयति महानेष उत्पातशब्दः।

मध्याह्नादित्यबिम्बं प्रसददतनुतमो दृष्टिरोधं विधत्ते
विश्वध्वंसाय धातुर्नृषु विधृतरुषः किं स्विदेष प्रयत्नः ॥१३७॥

(भयचकितः स्थितः ।)

कुरेशः । (कृताञ्जलिः) भगवन्! असीमा तव कृपा। बहिश्चक्षुः सर्वथा सम्यङ् न पश्यति। (राजानं राजपुरुषांश्चोद्दिश्य)

यूयं मम श्रेष्ठा बन्धवो हितकारिणश्च। एतदेव बहिश्चक्षुर्द्वयं न मामेतावत्कालपर्यन्तं भगवत्सकाशे नेतुमासीत् समर्थम्। तदर्थं श्रीश्रीभगवता विष्णुदेवेनापहृतं मम चक्षुर्द्वयम्। त्रिविक्रमेण विष्णुना मम शत्रुद्वयमपसारितम्। अहो मनश्चक्षुषा भगवन्तं यदि पश्येयम्।

भगवन् विष्णो सर्वजगदघापहारक! जगद् भवतु निर्मलं कल्मषलेशहीनम्। दिशि दिशि प्रसरतु वैष्णवमहिमा। वैष्णवी भावधारा करोतु जगद्विप्लावितम्।

(ततः प्रविशति कश्चन भिक्षुः)

चोलराजः। (प्रविशन्तं भिक्षुं निवार्य।) भिक्षो! राजसभागृहमिदं, न तव प्रवेशस्थानम्।

भिक्षुः। राजन्! अध्यवसायस्तव जातोऽद्य फलदायकः। बहुदिवसेभ्यस्त्वं यतसे स्म। अद्य महापुरुषस्यात्मबलिदानक्रमेण त्वमसि सार्थकप्रयत्नः।

अहो मूढमतिर्हि जनो यो भगवदिङ्गितं न बुध्यते।

राजन् कृमिकण्ठ! (सङ्गीतम्)

* शाश्वतं चक्षुर्यस्योन्मीलितं
　　रक्षिष्यति तं भक्तं श्रीविष्णुः सततम्।
समुद्रस्य वारि मन्यते त्वया निपीतं
　　वीक्षिष्यते त्वया चिरात् पारावारशतम् ॥१३८॥ *

राजन्! क्षुद्राया भूमेरधिपतिस्त्वं कोटिकोटिजगदधीश्वरस्य महिमानं न बोद्धुमसि समर्थः। यस्तु समर्थः, स त्वादृशस्य पामरस्य समुद्धरणाय राजते भगवच्चरणे चिराय निवेदितः।

भगवन् विष्णो! विजयस्व, विजयस्व च भक्तवर! भक्तवर! मत्सङ्गमङ्गीकृत्य कृपया श्रीरङ्गमागच्छ। अनन्तशयनं भगवन्तं तत्र चिराय वीक्ष्य त्वं धन्यतरो भविष्यसि।

राजा। (उच्चैर्विहस्य राजपुरुषानुद्दिश्य) भिक्षोरप्यहङ्कारः। अचिरादेवैष इतो निष्काश्यताम्। (सर्वे निष्क्रान्ताः।)

सप्तदशोऽङ्कः

(ततः प्रविशति श्रीरङ्गं प्रत्यावर्तमानः सशिष्यः श्रीरामानुजः, कुर्वन्ति नामकीर्तनं शिष्याः। प्रत्युद्गमनार्थमायान्ति शिष्या भक्ता अन्ये च।)

(कीर्तनम्)

नमामि श्रियं जगल्लालनहेतुं नमामि श्रीपतिं करुणैककेतुम्।
नमामि भक्तवरिष्ठं धर्मसेतुं धृतदेहं दुर्मार्गगतान् विनेतुम् ॥१३६॥

(एकत्र प्रविशन्ति कतिपये चण्डालाः)

काचित् चण्डालरमणी। अहो! कीर्तनरतानां भक्तानां मध्ये मध्यमणिरिव परमोज्ज्वलः सदास्मितः कोऽयं महावतार इव लक्ष्यते। एतदालपनश्रवणाय चेतो मे समुत्कण्ठते। मन्ये—

अस्यान्तरस्थः सुविशुद्धभावो
दन्ताङ्कुराणां द्युतिकैतवेन।
बहिर्भवन् पापहृतं विधातु-
र्विश्वं विशालं विमलं विधत्ते ॥१४०॥

चण्डालः। किन्तु ब्राह्मणोऽसौ; नास्माभिरस्य सकाशे गन्तव्यम्। (इति गमनोत्कां रमणीं वारयति)।

चण्डालरमणी। भो नारायण! सत्यं किमयं तव विधिर्यन्मानुषो मानुषं द्वेष्ट्यभ्यसूयति, शत-विधि-पाशैराबध्नन् निष्पेषयति चेति? सत्यं नु भगवन् एषा तवेच्छा?

त्वत्तो जगज्जातमिति श्रुतं यत्
सत्येतरत् तत् किमु कल्पनीयम् ?
न ह्येकतः प्राप्य पितुः शरीर-
मन्योन्यहिंसां पशवोऽपि कुर्युः ॥१४१

(श्रीभगवन्तं रामानुजं करुणमवलोकयति)

श्रीरामानुजः । (चण्डालीम् अवलोक्य) अये ! एषात्रागन्तुकामा कथं निवार्यते ? विष्णुवर्धन ! गच्छ, चण्डालभ्रातृवृन्दमत्र समाह्वय । कीर्तनरता वयम्—सर्वे जगज्जना गायन्तु कृष्णनाम, सर्वेषां चरमोपायो भगवन्निर्दिष्ट एव ।

(विष्णुवर्धनस्तामाह्वयति ।)

चण्डालरमणी । (सभयं समागत्य) भगवन्तं सर्वलोकपावनम् आचण्डालसर्वजनेभ्यो हरिनामदातारं विश्वरक्षकं प्रणमामि ।

श्रीरामानुजः । सर्वेषां युष्माकं मङ्गलं भूयात् । सर्वे यूयं सुखिनो भवत ।

चण्डालरमणी । देव ! चण्डाला वयम्, विशेषेणाहं चण्डाल-सहधर्मिणी—भवत्सकाशे समागत्य न त्वामुद्वेजयितुमिच्छामि । किन्तु केवलमिदमेव पृच्छामि—अपि नामास्माकं धर्मे नास्त्यधिकारः ?

भवान् किलाचार्यवरोऽत्र देशे
सर्वे भवन्तं गुरुवद् भजन्ते ।
ममाबलाया बत नीचजाते-
रुपास्यधर्मं भगवान् ब्रवीतु ॥१४२॥

रामानुजः । धर्मे नाधिकार इति किम् ? कथम् अधिकाराभावः ? सर्वे वयं भगवत्सन्तानाः ।

जगत्पिता चेद् भगवान् मतो न-
स्तर्ह्यात्मजास्तस्य हि सर्वजीवाः ।
एवञ्च न न्याय्यमिदं प्रतीये
नोच्चारयेन्नाम पितुः सुतो यत् ॥१४३॥

सत्यमधिकारो न कुलमपेक्षते, किन्तु स व्यक्तिगतकर्मानुसारी। शृणु "चण्डालोऽपि द्विजश्रेष्ठो हरिभक्तिपरायणः"।

चण्डालपत्नी। तच्छ्रोतुमिच्छामि देव! कोऽस्माकमुपायः? अपि हरिभक्तिः?

रामानुजः। बाढम्, हरिभक्तिरेव।

चण्डालपत्नी। देव! हरिभक्तिश्चेदुपायः पुनः पृच्छामि—का नाम सा भक्तिः?

रामानुजः। मधुरोऽयं प्रश्नः। सर्वे भक्ताः! यूयमपि शृणुत, भक्तिशब्दस्य विश्लेषणं मया पूर्वत एव थादृशं कृतम्। मयोक्तं श्रीभाष्ये ध्यानमुपासना भक्तिश्चेति समार्थवाचीनि पदानि। यथा—

"ध्यानं च तैलधारावदनवच्छिन्न-स्मृतिसन्तानरूपा ध्रुवा स्मृतिः। सा च स्मृतिर्दर्शनसमानाकारा। एवं च सति "आत्मा वाऽरे द्रष्टव्य" इत्यनेन निदिध्यासनस्य दर्शनरूपता विधीयते। एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाप्यभिधीयते उपासनापर्यायत्वाद्भक्तिशब्दस्येति।

चण्डालरमणी। देवदेव! दर्शनतत्त्वमिदं मह्यं कठिनं प्रतिभाति।

श्रीरामानुजः। भक्ताः! पश्यतात्रैवायाति प्रश्नोऽधिकारिभेदस्य।

आर्याणामधिकारिभेदकथनं तेनैव लब्धास्पदं
यत् सर्वो न हि सर्वमत्र भुवने विज्ञातुमस्ति क्षमः।
किन्त्वेतत् कुलसङ्गतं चिरमहो दृष्टं यतः सृष्टित-
स्तेनैषाऽधिकृता न चेयमिति हा जातिं श्रिता योग्यता॥१४॥

(चण्डालपत्नीमुद्दिश्य)—नैतत्तत्त्वं सुप्रकटं चेत् सम्यक्कृतयात्म-समर्पणं कुरु भगवते श्रीपुरुषोत्तमाय नारायणाय। एषा प्रपत्तिरन्यतम उपायश्चरमहितसाधनाय।

चण्डालरमणी। देव! सत्यं नु ब्रवीमि—एषोऽपि पन्था मह्यं कठिनः प्रतिभाति। नान्यः कश्चनोपायो विद्यतेऽस्मद्विधैर्जनैरव-लम्बनीयः?

श्रीरामानुजः। मातः! त्वं गुरुमिष्टरूपेणावलम्बस्व। एष उपायो गुरूपसत्तिर्नाम सहजसुगमचरमहितकारी। सर्वमानवानामाब्राह्मणचण्डालानाम् आबालवृद्धवनितानां गुरुरिष्टो गुरुः साध्यः गुरुः सर्वकल्याणप्रदः। श्रीगुरुमुखे भगवद्रूपमवेक्ष्य भगवत्पथे नित्यं चर।

चण्डालपत्नी। देव! एष उपायो मम शोभनः सुकरश्च प्रतिभाति। नितरामयमेव मयावलम्बनीयः।

विष्णुवर्धनः। (रामानुजमुद्दिश्य) इतः पूर्वं बौद्ध आसं साम्प्रतं भवत्कृपयाऽस्मि वैष्णवः संवृत्तः। बौद्धानां मते जगदिदं "दुःखं दुःखं क्षणिकं क्षणिकम्" इति। तेषां मतं नोपासनामार्गोऽस्त्येषि।

श्रीरामानुजः। विष्णुवर्धन! अपि बौद्धा नोपासनापरायणाः? भक्तिः सर्वेषामेव स्थिरा सम्पत्। अस्माकमुपनिषद्धर्म आनन्दतत्त्वपर इति परमशोभनमेतत्। "दुःखं दुःखम्" इत्यनेनापि दुःखनिवृत्तिरेवेष्यते।

विष्णुवर्धनः। देव! भगवन्! त्वन्महाहृदयप्रभावेण सर्वे दाक्षिणात्यबौद्धा वैष्णवा जाताः। अहो महापुरुषचरितमाधुर्यम्!

श्रीरामानुजः। विष्णुवर्धन! तव मयि भक्तिप्राबल्यमपि तत्र कारणमिति न मया विस्मर्यते।

विष्णुवर्धनः। देवदेव! श्रुतं किल मया काचन महम्मदीया योषिद् भोगसुखं सर्वथा विसृज्य विष्णुधर्ममार्गं भजत इति। ततो महम्मदीयायापि भागवतधर्मो रोचत इति वक्तुं शक्यते।

श्रीरामानुजः। विष्णुवर्धन! सेयं महम्मदीयकन्यका मम माता लचिमारसंज्ञिका तव पुरत एवास्ते। मातर्लचिमार! त्वमुत्तिष्ठ।

लचिमारः। देव! भगवन्तं वन्दे। (उत्तिष्ठन्ती स्वगतम्)

त्यक्त्वा स्वधर्ममुपयामि यदन्यधर्म-
मीश ! क्षमस्व तदिमां हठकारितां मे ।
प्राक् कोऽपि मह्यमदिशन्न तवोपसत्तिं
यस्मात्ततो न विदितो महिमा मया ते ॥१४५॥

तथापि—

आशा पुनर्मम महत्युपजायते यत्
सम्पत्कुमारमहमत्र यमाश्रिताऽस्मि ।
तन्वन्तरं तव वदन्ति तमेनमार्याः
स्यान्मे तदद्य युवयोर्युगपत् सपर्या ॥१४६॥

चण्डालपत्नी । अहो माधुर्यम् अहो सौन्दर्यं महम्मदीयललनायाः ।

श्रीरामानुजः । नेयं साधारणी महम्मदीयकन्यका परं दिल्ली-सम्राड् दुहिता, भगवत्सम्पत्कुमारप्रेम्णा दिल्लीधामतोऽत्रागता भागवत-प्रेमविह्वला दत्तप्राणाऽत्र तिष्ठति । शिष्याः ! शृणुत यूयमस्या धर्मान्तरग्रहणरहस्यम् ।

दिल्लीश्वरेण सहसापतता कदाचित्
सम्पत्कुमार-भगवानपहृत्य नीतः ।
तद्विश्वरञ्जनममुष्य विलोक्य रूपं
सम्राट्सुता रतिमतीव बबन्ध देवे ॥१४७॥

शिष्याः । ततस्ततः ?

श्रीरामानुजः । ततश्च

सम्राड् विज्ञाय पुत्र्याः प्रणय-परिणतिन्तत्र सम्पत्कुमारे
मूलोच्छेदं विधित्सन् पुनरिममनयन्मन्दिरं पूर्वमेव ।
हा हा किन्त्वस्य जातं फलमतिविषमं यत् सुतेयं तदीया
साकं देवेन देशं स्वमपि विजहती दक्षिणावर्तमागात् ॥१४८॥
सेयं लचिमाराख्या सम्राट्सुता निजाचारमपहाय ।
महता भक्तिरसेन सम्पत्कुमारमाश्रित्य तपस्यति ॥१४९॥

(कुबेरमुद्दिश्य) अयं च पुनः कुबेरस्तया सह दिल्लीधामतोऽत्र समागतो मानवप्रेममाध्यमेन भागवतप्रेमसुधामविरलमास्वादयति ।

कुबेरः । देवदेव ! भवतां स्नेहसुधाधारया निषिक्तोऽहमात्मानं सर्वथा धन्यधन्यं मन्ये । अहो सर्वधर्मदर्शनसमन्वयवादपरायणो महामहर्षिर्भगवदवतारो न्वस्माकं गुरुदेवो भगवान् श्रीश्रीरामानुजाचार्यः ।

चण्डालपत्नी । ततो बौद्धा महम्मदीया अपरेऽपि धर्मान्तरावलम्बिनः समाकृष्टा वर्तन्ते वैष्णवमहाधर्मं प्रति । देवदेव ! महदेतेषां सौभाग्यम् ।

श्रीरामानुजः । मदीयाः शिष्याः ! यूयमपि भगवतः श्रीविष्णोर्महाधर्ममनुसरन्तो भवत सुखिनः । मया जगतः सुखं शान्तिः कल्याणमेव च केवलम् आकाङ्क्ष्यन्ते ।

चण्डालपत्नी । वयं धन्याः स्मः ।

कुबेरः । नैतन्महासम्मेलनस्थानं केवलम् आचण्डालब्राह्मणानां, बौद्धानां महम्मदीयानां वा । पुनः शैवानामपि । गुरुदेवस्य सम्प्रति परमभक्तः श्रीगोविन्दः प्राग् आसीद्बाणलिङ्गोपासकः परमशैवः, श्रीगुरुदेवस्य कृपाबलेन बहुभिः शिवभक्तैः सह वैष्णवधर्मदीक्षितोऽभूत् ।

तद्वयं केवलं प्रार्थयामहे भगवतो गुरुदेवस्य स्वास्थ्यायतिं, सुदीर्घतमजीवनञ्च ।

श्रीरामानुजः । परमप्रिय कुबेर ! ततोऽप्यभ्यधिकमहं वाञ्छामि—युष्माकं भक्तानां सर्वेषां परमपूतजीवनं सौन्दर्य-माधुर्य-विभूतिविकाशम् । अत्र प्राधान्येनोपकरोति मम कुरेशसदृशस्य भक्तस्य चरित्रमाधुर्यम् ।

सर्वे । महागुरो ! तत् कीदृशमिति वयं भृशं शुश्रूषामहे ।

रामानुजः । कुरेश ! प्राणाधिक शिष्योत्तम ! मा त्वं लज्जस्व । त्वद्विषयकं किमपि वदामि ।

कुरेशः । (उत्थाय) भगवन् ! नारायण ! मद्विषयकं तत् किं नु स्यात् ?

हीनातिहीनं निखिलान्मनुष्याद् योऽहं सदा स्वं परिचिन्तयामि।
तस्य स्वभावे मम को विशेषो देवेन दृष्टः क्रियते महोच्चैः ॥१५१॥

(व्रीडापन्न उपविशति)

रामानुजः। यूयं सर्वे शृणुत। एष कुरेशश्चोलाधिपतेरादेशान्नष्टचक्षुर्मयादिष्ट आसीत् स्वनष्टचक्षुर्ज्योतिःपुनरुद्धाराय। ततोऽयं श्रीपतिपदसमाराधनायात्मानं न्ययोजयत्। किन्तूपस्थिते फलकाले यदनेनानुष्ठितं तदतीव विचित्रम्।

कुबेरो विष्णुवर्धनश्च। भगवन्! वयं सर्वे माहात्म्यमेतस्य श्रोतुमिच्छामः।

श्रीरामानुजः। सुतीव्रसमाराधनया भृशं सन्तुष्टे भगवति श्रीपतौ को नाम वरस्त्वया प्रार्थ्यत इति पृच्छत्यनेन वत्सेन वृतमासीच्चक्षुर्नाशकस्य चोलाधिपतेश्चतुर्ग्रामाख्यस्थानस्थ निष्पापत्वम्। दूरीभूतासीदस्य मनसः स्वचक्षुर्ज्योतिःपुनरवाप्तिवासना।

कुरेश एष स्वदृशोर्निरीहस्तस्यैव चायाचत राज्यसौख्यम्।
यस्याज्ञयाऽसौ नयनद्वयेन चिराय रिक्तः परमार्त आस्ते ॥१५२॥

सर्वे। अहो हृदयप्राशस्त्यं महासाधोरस्माकं सुधन्यकुरेशस्य !

श्रीरामानुजः। पुनरपि शृणुत।

भूयोऽप्येवं तपसि स मया योजितः स्वार्थमूढ-
स्तुष्टाद् देवादवृणुत ततो निर्वृतिं चोलभर्तुः।
वृत्ते चैवं स तु वरदराड् याच्यमानो मयैव
प्रायेणास्मै नयनयुगलं दत्तवान् प्रीतये मे ॥१५३॥

चण्डालपत्नी। देवदेव! मधुरादपि मधुरमेतत्। ततो ह्युक्तं सर्वशास्त्रेषु—यदा यदा हि भगवदवतारः समायाति धर्मसंरक्षणाय धर्मोन्नतिसाधनाय वा, तदा तदैव भूतलमायान्ति तेन सह तस्य पार्षदा उपपार्षदाश्च सर्वे। अहो महात्मा कुरेशोऽयं सर्वथा हनूमन्तमप्यतिक्रामति भक्त्या सेवया च।

कुबेरः। महाप्राज्ञ महामण्डलेश्वर भगवन्! भवद्दत्तोपदेशोपहारेण वयं कृतकृतार्थाः। किन्तु नोत्तरं दत्तं भवता भवज्जीवनायतिविषये।

भवत्स्नेहच्छत्रतले समानीता विश्वमानवाः शैवा बौद्धा महम्मदीया अन्ये च नानाधर्मावलम्बिनः प्रतिनिमिषं परानन्दं ब्रह्मास्वादसहोदरं भजन्ते। एतदानन्दोपभोगभाग्यमस्माकं भवन्महाजीवनसापेक्षम्। ततो नु पृच्छामि।

श्रीरामानुजः। ममोत्तरसाधकाः कुरेशकुबेरप्रमुखाः! सर्वे सावधानं शृणुतास्य प्रश्नस्योत्तरम्। जगति न किमपि सुचिरस्थायि, विशेषेण मानवस्य शरीरम्। युष्माकं चिन्ताऽभ्यधिका चेन्निर्मापयत काञ्चन प्रस्तरमूर्तिं, तत्र मच्छक्तिं निधास्यामि। कुरसिंहासनोपविष्टः पराशरो मम भक्तमहामण्डलस्याधीश्वरो भविष्यतीत्यत्रास्ते मम परमानन्दः।

चण्डालपत्नी। किन्त्वेष भविष्यवृत्तान्तो जनयति मम हृदये गुरुव्यथाम्। गुरुदेव! कति कति मधूपदेशा भवतां वर्तन्ते। तद्दानेन प्रमोद्यन्तां शिष्यजनाः।

श्रीरामानुजः। अल्पेन किल दुःखायते मातृहृदयम्। किन्तु कथं दुःखं मातः! मरणं केवलं जन्मनो रूपान्तरम्। कथं न सुखं चिन्तयामि भविष्यवृत्तम्—गोविन्दस्य क्रोडे मस्तकम् आन्ध्रपूर्णस्य चोत्सङ्गेऽङ्घ्रिं संप्रसार्य श्रीश्रीविष्णुपदे चिराय निलीनो भविष्यामीति।

लक्ष्मिमारः। पितः! नैतद्वदतु भवान्। भवद्भिरहन्यथां न वयं कदापि सोढुं पारयिष्यामः।

श्रीरामानुजः। मातः! शृणु। युष्माकं हिताय मया विलिखिता बहवो ग्रन्थाः, रोपिता बहवो महान्तः शिष्यतरवः, स्थापिताश्च मातृहृदयोद्यानसदृश-प्रशस्तोद्यान-मालिकाः। धर्मो मेऽवश्यमेव सुखं संप्रचरिष्यति यावच्चन्द्रदिवाकरम्।

लचिमारः। अहो परमकृपा भगवतो गुरुदेवस्य मादृशाधमजने।

रामानुजः। कुरेश! अप्यन्यत् किमपि युष्मभ्यं कर्तुं पारयामि।

कुरेशः। महागुरो! इतः परमपि करणीयमस्ति? तथापीत्थमस्तु—

धर्मोद्दीप्तं द्योततामद्य विश्वं
शोभन्तां नो मातरोऽपूर्वभासा।
द्वेषो दूरं यातु चित्ताज्जनानां
साङ्गोपाङ्गः श्रीपतिः पातु पापान् ॥१४३॥

श्रीरस्तु। ॐ शान्तिः शान्तिः शान्तिः।

॥ समाप्तमिदं विमलयतीन्द्राख्यं नाटकम् ॥